नेरामानुजायनमः ओंनार्हंतीर्थगोर्युणपेर्महर्षिभिर्वहर्दिवम् नोस्तुव्यमानोप्युगो विद्युर्विज
तान् १ पूर्वार्द्धं कथितात्तुर्य्यपत्रं ममाध्यम्येवार्त्तनः प्रायेयाश्रेष्य कृष्य नेटतीयाध्यायगोच
रः २ तत्रादौ दशलकाराः प्रदर्श्यन्ते लट्। लिट्। लुट्। लृट्। लेट्। लोट्। लङ्। लिङ्। लुङ्। लृ
ङ्। एषु पञ्चमो लकारश्छंदोमात्रगोचरः वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात्
अटावितो लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युर्
अकर्मकेभ्यो भावे कर्त्तरि च लस्य अधिकारोयम् तिप्तस्। झि। सिप्। थस्। थ। मिप्। वस्। राम
मस्। त। आतां। झ। थास्। आथां। ध्वं। इट्। वहि। महिङ्। एते अष्टादश लस्यादेशाः स्युः लः प
रस्मैपदम् लादेशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदम् तङ्प्रत्याहारः शानच्का

सि॰कौ॰ धातुरूपपदं यस्य धातोस्तत्समानाधिकृतिभूते सति मध्यमः स्यात् परिहासे गम्यमाने मन्युत्तेस्तु उत्तमः
२ स्यात् स चैकार्थस्य वाचकः स्यात् अस्मद्युत्तमः तथाभूते अस्मद्युत्तमः स्यात् शेषे प्रथमः
मध्यमोत्तमयोरविषये प्रथमः स्यात् भू सत्तायाम् कर्तृविवक्षायां भूतिप् इति स्थिते तिङ्
शित्सार्वधातुकम् तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः कर्तरि शप् कर्त्रर्थे सार्व
धातुके परे धातोः शप् स्यात् शपावितौ सार्वधातुकार्धधातुकयोः अनयोः परयोरिगन्ताङ्ग
स्य गुणः स्यात् अवादेशः भवति भवतः झोऽन्तः प्रत्ययावयवस्य झस्यान्तादेशः स्यात् अतो गु
णे भवन्ति भवसि भवथः भवथ अतो दीर्घो यञि अतोऽङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके एम २
परे भवामि भवावः भवामः स भवति तौ भवतः ते भवन्ति त्वं भवसि अहं भवामि एहि मन्ये ओद

न चैषैते संज्ञाः स्युः पूर्वसंज्ञापवादः अनुदात्तङित आत्मनेपदम् अनुदात्तेत उपदेशे यो ङित् तद
न्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञित
श्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदम् आत्मनेपदनि
मित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ
उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकशः
लः प्रथमादिसंज्ञानि तिङः त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः
युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङः प्रयोक्तव्या इति नियमार्थमिदं तत्र
युष्मानेव ... युष्मानेव च मध्यमः स्यात् महादेवमस्मोपपदमनुपातत्तमात्केवल च मेघ

आदिभूतादचः परस्य तु द्वितीयस्य ॥ भूव् भूव् अ इति स्थिते पूर्वोऽभ्यासः अत्र ये द्वे विहिते तयोः पू
र्वोऽभ्याससंज्ञः स्यात् हलादिः शेषः अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते इति वलोपः ह्र
स्वः अभ्यासस्याचो ह्रस्वः स्यात् भवतेरः भवतेरभ्यासोकारस्य अः स्याल्लिटि अभ्यासे चर्च अभ्यासे
झलां चरः स्युर्जशश्च झशां जशः खयां चरः तत्रापिं कृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृ प्र
तिचरः इति विवेकः आन्तरतम्यात् असिद्धवदत्राभात् इत ऊर्द्ध्व आपादपरिसमाप्तेराभीयं
ना समाश्रये तु स्मिन्कर्तव्ये तदसिद्धं स्यात् इति वुकोसिद्धत्वादुवङि प्राप्ते वुग्युटावुवङ्यणोः एम
सिद्धौ वक्तव्यौ बभूव बभूवतुः बभूवुः आर्द्धधातुकस्येड्वलादेः वलादेरार्द्धधातुकस्य इडाग २
मः स्यात् बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम अनद्यतने लुट् भविष्य

॥भो ह्यसे भुक्तः सोतिश्चिभिः एतमेतत्वा मन्ये ओदनं भोक्ष्येये भोक्ष्यध्वे भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे इत्यादि
मन्यसे मन्येथे मन्यध्वे इत्यादिरर्थः युष्मद्युपपदे इत्यादनुवर्त्तते तेनेह न एतु भवान् मन्यते ओदनं भो
क्ष्ये इत्यादि प्रहासे किं यथार्थकथने मा भूत् एहि मन्ये ओदनं भोक्ष्यसे इति परोक्षे लिट् भूतान
द्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् लस्य तिबादयः लिट् च लिडादेशास्तिङ् आर्धधातुकसंज्ञ एव
स्यान्न तु सार्वधातुकसंज्ञः तेन शब्वादयो न परस्मैपदानां णलतुसुस्थलथुसणल्वमाः लिटः ति
प्त्यादीनां नवानां णलादयो नव स्युः भू अ इति स्थिते भुवो वुग्लुङ्लिटोः भुवो वुगागमः स्यात्
लुङ्लिटोरचि नित्यत्वाद्वुग्गुणवृद्धी बाधते एकाचो द्वे प्रथमस्य अजादेर्द्वितीयस्य इत्यधि
कृत्य लिटि धातोरनभ्यासस्य लिटि परे अनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः

ल०कौ० भविष्यदर्थाद्धातो लृट् स्यात्क्रियार्थायांक्रियायामसत्यांसत्याञ्च स्यट् भविष्यति भ
५ विष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः
लोट् च विध्यादिष्वर्थेषु धातोर्लोट् स्यात् आशिषि लिङ्लोटौ एरुः लोट इकारस्य उः स्या
त् भवतु तुह्योस्तातङाशिष्यन्यतरस्याम् आशिषि तुह्योस्तातङ् वा स्यात् अनेकाल्त्वात्
सर्वादेशः यद्यपि ङिच्चेत्ययमपवादस्तथाप्यनन्त्यार्थोऽङित्वे तु गुणवृद्धिप्रतिषेधे चरितार्थ इति गुण
वृद्धिप्रतिषेध सम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारेतात्सु मन्थरं प्रवृत्तः पूर्वे एव
बाध्यते इहोत्सर्गापवादयोरपि समबलत्वात् भवतात् लोटो लङ्वत् लोटो लङ इव
स्यात् तेन तामादयः सलोपश्च न पाहि तस्थस्थमिपां तांतंतामः ङित्वं

समन्तविधिः २

ष्यनद्यतनेर्थे धातोर्लुट् स्यात् स्यतासी लृलुटोः लृ इति लृङ्लृटोर्ग्रहणम् धातोः स्यतासी एतौ प्रत्य-
यौ स्तः लृलुटोः परतः शबाद्यपवादः आर्द्धधातुकं शेषः तिङ्शिद्भ्योन्यो धातोरिति विहितः प्रत्यय एत-
त्संज्ञः स्यात् इट् लुटः प्रथमस्य डारौरसः डारौरसः एते क्रमात्स्युः डित्वसामर्थ्यादभस्यापि टेर्लोपः
पुगन्तलघूपधस्य च पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुकार्द्धधातुकयोः
येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् येन भिन्नत्वीत्यादावनेकव्यवधानेन स्यको
न गुणः भवितृ स्था नैको गुणोभावात् दीर्घस्य दीर्घाच्चेत्यो दिष्टं गुणवृद्धी नेस्तः भव
ता तासस्त्योर्लोपः तासेरस्तेश्च लोपः स्यात् सादौ प्रत्यये परे रि च रादौ प्रत्यये तद्वत् भवितारौ
भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः लृट् शेषे च ।

सि०कौ०
५

सप्रवर्त्तनम्। आमंत्रणं कामचारानुज्ञा॥ अधीष्टं सत्कारपूर्वको व्यापारः॥ प्रवर्त्तनायां लिङ्॥ इत्ये
वसुवचं॥ आशिषि धातुपादानम्प्रार्थम् यासुट्परस्मैपदेषूदात्तो ङिच्च॥ लिङः परस्मैपदा
नां यासुडागमः स्यात्सचोदात्तो ङिच्च॥ ङित्वाकेर्यणे क्वचिदुवङ्कार्यप्रवृत्तिर्विधानमिति प्रति
षेधप्राप्ते· आदेशस्य ग्रहणञ्च॥ शिवमपोहालिङ्म्॥ सुट्तिथोः॥ लिङः सकारथकारयोः सुट्
स्यात् सुत यासुट् बाध्यते लिङो यासुट् तकारस्य सुट् इति विभ्रमभ्रमे स्यात्॥ लिङः सलोपोऽनन्त्यस्य
सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात्॥ अन्तस्सकारस्य यस्यापि निवृत्तिः सुटः अवर्णान्ता। राम
शीर्लिङ्· स्फुटनं तत्र आत्मनेपदे॥ अतो येयः॥ अतःपरस्य सार्वधातुकावयवस्य या इत्यस्य ५
इय् स्यात् गुणः लोपो व्योर्वलि॥ यलोपः॥ भवेत्॥ सार्वधातुकमपित्॥ चिकीर्षेत् मध्येप

कृत्भासुः नित्संङितः सकारान्तस्य ङितस्तस्य नित्यं लोपः स्यात् अलोन्त्यस्येति सस्य लोपः भ
वतात् भवन्तु सेर्ह्यपिच्च लोटः सेर्हिः स्यात् सोऽपिच्च अतोहेः अतःपरस्य हेर्लुक् स्यात् भव भ
वतात् भवतं भवत मेर्निः लोटो मेर्निः स्यात् आडुत्तमस्य पिच्च लोडुत्तमस्याडागमः स्यात् स च पि
त् हिन्योरुत्वं न इकारोच्चारणसामर्थ्यात् भवानि भवाव भवाम अनद्यतने लङ् अनद्यत
नभूतार्थवृत्तेर्धातोर्लङ् स्यात् लुङ्लङ्लृङ्क्ष्वडुदात्तः एषु परेष्वङ्गस्याडागमः स्यात्स चोदात्तः
इतश्च ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः स्यात् अभवत् अभवताम् अभवन्
अभवः अभवतम् अभवत अभवम् अभवाव अभवाम विधिनिमन्त्रणामन्त्रणाधीष्टसं
प्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु द्योत्येषु वाच्येषु धातोर्लिङ् स्यात् विधिः प्रेरणं भृत्यादेर्निकृष्टस्य

जौ। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।। एभ्यः सिचो लुक् स्यात्।। गापाविहेणादेश
पिबतीह गृह्येते।। भूसुवोस्तिङि।। भूसु एतयोः सार्वधातुके तिङि परे गुणो न स्यात्।। अ
स्तिसिचोऽपृक्ते।। सिच्च अस चेति समाहारद्वंद्वः। सिचोवृस्यसोऽम्भत्वं। अस्तीत्यव्यये
न कर्मधारयः। ततः पंचम्याः सोत्रो लुक्।। विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ई
डागमः स्यात्।। इति ईट् प्राप्ते इह सिचो लुप्तत्वात्। अभूत्।। हलः किम्। एधिषि। अपृ
क्तस्य किम्। एधिष्ट। अभूताम्। सिजन्तस्याविद्यमानत्व सिचो लुप्तत्वाद् हि दीर्घपरस्माङि संव
धिनोर्गुणस्स्यात्।। इति प्राप्ते। भुवो वुक्। सिज्लुकि आदन्ता देवङ्गुणस्स्यात्।। अभूवन्। एम
अभूः। अभूतं। अभूत। अभूवम्। अभूव। अभूम। न माङ्योगे। अडाटौ न स्तः। ६

अट् स्यात्। तेन अन्त्यलोपः प्राप्तं बाध्येत भवेदित्यादौ गुणपरत्वाद्दीर्घः स्यात्॥ भवेताम्। झेर्जुस्॥ लिङो झे
र्जुस् स्यात्। जइत्। उस्यपदान्तात्॥ अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात् इति प्रा
प्ते॥ परत्वान्नित्यत्वाच्चातो येयः इति प्राप्तः। अत्र पदान्ते उः त्वात्पररूपं न्याय्यं न तु याप्यासुडित्ये
तस्य इय् इति व्याख्येयम्। एवं च सलोपस्यापवादः इय् अतो येयः इत्यत्र तु संधिरार्षः॥ भवेयुः
भवेतम्। भवेत। भवेयम्। भवेव। भवेम। लिङाशिषि। आशिषि लिङ् तिङः आर्धधातुकसंज्ञः
स्यात्। किदाशिषि। आशिषि लिङो यासुट् कित् स्यात्। स्कोरिति सलोपः। क्ङिति च। गित्
कित्ङि निमित्ते इक्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्ताम्। भूयासुः। भूयाः। भूयास्तम्।
भूयास्त। भूयासम्। भूयास्व। भूयास्म। लुङ्। भूतार्थे धातोर्लुङ् स्यात्। माङि लुङ्। सर्वलकाराप
वादः। स्मोत्तरे लङ् च। स्मोत्तरे माङि लङ् स्यात् लुङ् च। च्लि लुङि। शपाद्यपवादः। च्लेः सिच्। इत्यवि

सि॰ कौ॰ षान्तवर्जं गदनदादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्या
७ त् । प्रणिभवति । प्रनिभवति । इहोपसर्गाणां समस्तानामपि संहिता नित्या । तदुक्तं
संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्ष
ते ॥ इति समासार्थनिर्देशाम्नायपलक्षणम् ॥ याग्यान्त्वर्गो भवतीत्यादावुपघातस्त्या ।
घर्थीत ॥ उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । संभवति । अनु
भवति । अभिभवति । उद्भवति । परिभवति । सत्रादिलक्षणार्थावगतेः । उक्तं च । उपस
र्गेण धात्वर्थो बलादन्यः प्रतीयते । प्रहाराहारसंहारविहारप्रतिहारवदिति ॥ एषां राम
चैके पठन्ति षट्त्रिंशदनुदात्तेतः । टित आत्मनेपदानां टेरे । टितोलस्यात्मनेपदानां ७

माभवान्भूत् । मास्मभवत् । मूढ्वा । लिङ्निमित्ते लृङ् क्रियातिपत्तौ । हेतुहेतुमद्भावादि
लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियायाश्चानिष्पत्तौ गम्यमानायाम् । अभ
विष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत ।
अभविष्यम् । अभविष्याव । अभविष्याम । तेप्राग्धातोः । ते गत्युपसर्गसंज्ञा धातोः
प्रागेव प्रयोक्तव्याः । कानिलोपः । उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्य
स्य नस्य णः स्यात् ॥ प्रभवाणि । दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः ॥ दुः
स्थितिः दुर्भवानि ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वक्तव्यम् ॥ अन्तर्हि
अन्तर्ह्निः । अन्तर्भवाणि । वाच्यविभक्तो कवर्गादावुपदेशे । उपदेशे कादित्वादि

सि०कौ० र्थयोरभेदश्च यः संप्रदिस्तु प्रत्याहारे तङ्गृहीतोपि नान्वितार्थ त्वान्न प्रयुज्यते। कर्तृगे तु क्रि
८ याफले परगामिनि परस्मैपदे प्राप्ते॥ आम्प्रत्ययवत्कृञोनुप्रयोगस्य॥ आम्प्रत्ययो य
स्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोप्यात्
मनेपदं स्यात्॥ इह पूर्ववदित्यनुवर्त्य वाक्यभेदेन संबध्यते पूर्ववदेवात्मनेपदं न तु त
द्विपरीतमिति। तेन कर्तृगेपि फले इन्धांचक्रे माद्यो नत्तङ॥ लिटस्तझयोरेशिरेच्
लिडादेशयोस्तझयोरेशिरेचौ स्तः। एकारोच्चारणं ज्ञापकं तङ आदेशानां टेरेत्वं रम
नेति। तेन झयोरेत्त्वं न। इरयोरित्यसिद्धे। असंयोगाल्लिट् कित्॥ असंयोगात्परोपि लिट् कि ८
त्स्यात्। कृतिचे तिनिषेधात्। सार्वधातुकार्धधातुकयोरितिगुणे प्राप्ते। ह्रस्वान्तत्वाद्

धरे त्वं स्यात्॥ एधते। सार्वधातुकमपित्। अपित्सार्वधातुकं ङिद्वत्स्यात्॥ आतो ङितः। अतः परस्य
ङितामाकारस्य इय् स्यात्॥ एधेते। एधन्ते। थासः से। ङितो लस्य थासः से स्यात्॥ एधसे। एधेथे।
एधध्वे। अतो गुणे। एधे। एधावहे। एधामहे। इजादेश्च गुरुमतोऽनृच्छः॥ इजादिर्यो धातुर्गुरु
मानृच्छत्यन्यस्तस्मात् आम् स्याल्लिटि। आमो मकारस्य नत्वं मा भूत् कासोरा इति धानाच्छोपको
लिट इति भाषः ५ ना। आमः। आमः परस्य लुक् स्यात्॥ कृञ्चानुप्रयुज्यते लिटि॥ आमन्ताल्लिट्पराः कृभ्वस्त
योऽनुप्रयुज्यन्ते। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य॥ आम्प्रकृतेर्यद्वत्पदं तद्वदनुप्रयो
गेऽप्यात्मनेपदं स्यात्॥ लिटस्तझयोरेशिरेच्॥ लिडादेशयोस्तझयोः एश् इरेच् एतौ स्तः। एधा
चक्रे॥ कृञ्ध्वन्तिलिङामः॥ तिङां क्रियासामान्यवाचि त्वादाम प्रकृती नापि शेष वाचि त्वात् जद
॥ आमेः॥ मिल मद त तातापक्ष पक्ष तं त्वत॥ आमका सोरम विधानाद यण तान्विरेरापि॥ ४

सि॰कौ॰
९

एकाचोपि न निषेधः॥ आदेशोपदेशे नैकाच्त्वात्॥ अनुदात्तान्तानुपस्मेव संग्रहोस्य
न्ते। एधांचकृषे। एधांचकृढ्वे। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। इणन्तादङ्गात्परेषां
षीध्वंलुङ्लिटां धस्य ढः स्यात्॥ एधांचक्रे। एधांचकृवहे। एधांचकृवहे। एधांच
कृमहे। एधांबभूव। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथाहि कस्य चानुप्रयुज्य
त इति किं। भिभिदां बूयात्॥ अत आदेः। अभ्यासस्यादेरतो दीर्घः स्यात्। परत्वादपवादः। ए
धामास। एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि
च। धादौ प्रत्यये परे सलोपः स्यात्। एधिताध्वे। ह एति। तासस्त्योः सस्य हः स्यादेति
ते। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे।

राम
९

ः माने। हृदिर्घ चनेचि। हृत्वनिमित्ते श्वद्विपरे न च श्वादेशो न स्यात्॥ दृ त्वेकर्तृवे। उत्तर।
श्रेष्पासन्नवर्णस्य श्वास्याद्यन्यये परे॥ न स्यये किम्॥ व न श्व रूपत्वं॥ हलादिशेषः॥ कु
होश्चुः॥ अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात्॥ एधाञ्चक्रे। एधाञ्चक्राते एधाच
क्रिरे॥ एकाच उपदेशेऽनुदात्तात्॥ उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्याद्धातु
कस्येण्न स्यात्॥ उपदेशोद्र्भुभया न्यो एकाचइति किम्॥ यङ् लुग्न्तावृत्तिर्ये भास्यात्॥
स्मरति हि। घ्रिते पाशपानुवन्धेन निर्दिष्टं यङ्गणे न च। यत्रेकाज्ग्रहणं चैव पञ्चैतानि न
यङ्लुकीति। एतच्चैवैकाज्ग्रहणेन ज्ञाप्यते॥ अ च इत्येवैक न्यविवदं यानदृतोयरहणे
न च। सिद्धे एकाग्रहणमास्मा म ष्वे ष्मोदनेकाचकोपदेशो यावर्म तिते नवधेर्द न्तुपदेश

सि॰ कौ॰

१०

यवन्तास्त्वम्॥ एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीया-
स्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषाताम्।
आत्मनेपदेष्वनतः। अकारान्तस्मात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात्। ऐधि-
षत। ऐधिष्ठाः। ऐधिषाथाम्। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। ऐधिढ्वम्। इड्वा एव
...ग स्यादिति मतम्। ऐधिध्वम्। ढधयोर्द्वित्वसमस्य च द्वित्वविकल्पात्। ऐधिढ्
... ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधिष्येताम्। ऐधिष्यन्त।
...ऐधिष्येथाम्। ऐधिष्यध्वम्। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। उ एम
...र्मसंगाद्रुदात्ताः संग्रहन्ते॥ उ ह्रस्वनेर्यो नित्ये हलगुणी ह्नुन १०

ष्ये। एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमेतः। लोटाकारस्याम
। एधेताम्। एधन्ताम्। सवाभ्यां वामौ। सवाभ्यां परस्य लोटेतः क्रमात् व
। एधस्व। एधेथाम्। एधध्वम्। एतऐ। लोडुत्तमस्यैत ऐ स्यात्। आमोपवादः
ावहै। एधामहै। आडजादीनाम्। अजादीनां आट् स्यात् लुङादिषु अटोऽपवादः
ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वं। ऐधे। ऐधावहि। ऐधा
महि। लिङः सीयुट् सस्य लोपः। एधेत। एधेयाताम्। झस्य रन्। लिङो झस्य रन् स्यात्
एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्। इटोऽत्। लिङादेशस्येट अत् स्यात्। एधेय। एधे
वहि। एधेमहि। आशिषि लिङ् आर्द्धधातुकत्वात् लिङः सलोपो न। सीयुट् सुटोः अन्त्यस्याव

सि.कौ.
११

घत्तरः। तदादेश तमेदेनुक्लिंतो यो चतुरादिषु ॥ तस्य दीर्घो नाम पितुं रूपनानिर्देशात्त्राह
तः ॥ ७ ॥ किल्ले। स्त्रियां पञ्चो हि ष्य तुधो मन्मथु ष्य म्लिमः रूपना ॥ वाहिः शपालु का यो ति
निर्दिश मनि वृत्तये ॥ ८ ॥ निजि राति जिर्हश स्कृ इति सानुबंधात्प्रमीतथा ॥ विन्दति श्वादू
सौमीर्देरिष्टो भाष्यो पि दृश्यते ॥ ९ ॥ व्याघ्रेभ्यस्याद्यत्स्वेन न्मेहपेतु रितिस्थितं ॥ रं जिम
त्री अदिपदी तुदस्तु धरतु षित्रमी शिषिः ॥ १० ॥ भाष्यानुज्ञानवेहि ॥ का व्याघ्रेभ्यस्या
दि संमतेः ॥ ११ ॥ स्पर्द्ध चैत्र्यो। संघर्षः पूरामि भवेहा ॥ भाचर्षेनोपसंयहादकमेकः
स्पर्द्धते। शत्रूर्णः वेद्धुः। भाषस्यस्पशर्व्याः स्वयंः शिष्यांते ॥ हलादिशेषापवादः ॥ पू एम
स्पर्द्धे। सस्पर्द्धिंता। स्पर्द्धिष्यते। स्पर्द्धतामम् ॥ म स्पर्द्धतां। स्पर्द्धेत। स्पर्द्धिषीष्ट। अस्प ११
र्द्धिष्ट। अस्पर्द्धिष्यत ॥ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ॥ गाधते। जगाधे ॥ वाधृ लोड

नु श्विडीङ् श्रिभिः ॥ वृङ् वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥ १ ॥ शक्लृ पच्मुचि
रिच् वच् विच् सिच् प्रच्छि त्यज निजिर् भजः ॥ भंज भुज् भ्रस्ज मस्जि यज् युज् रुज् रंज्
विजिर् स्वंज संज सृजः ॥ २ ॥ अद् क्षुद् खिद् छिद् तुदि नुदः पद्य भिद् विद्यतिर्विनद् ॥ श
द् सदी स्विद्यतिः स्कन्दि हदी क्रुध् क्षुधि बुध्यती ॥ ३ ॥ बंधिर्युधि रुधी राधि व्यध् शुधः सा
धि सिध्यती ॥ मन्य हन्नाप् क्षिप् छुप् तप् तिप् स्तृप्यति दृप्यती ॥ ४ ॥ लिप् लुप् वप् शप् स्व
प् सृपि यभ् रभ् लभ् गम् नम् यमो रमिः ॥ क्रुशि दंशि दिशी दृश् मृश् रिश् रुश् लिश् विश् स्पृ
शः कृषिः ॥ ५ ॥ त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्यतयो घसिः ॥ वस
तिर्दह दिहि दुहो नह मिह रुह लिह वहिस्तथा ॥ ६ ॥ अनुदात्ता हलन्तेषु धातवो द्व्यधिकं

स्कि० कौ० १२ शि

णत्व।इदितो नुम्धातोः।स्कुन्दते।चुस्कुन्दे ९ श्विदि श्वैत्ये।अकर्मकः।श्विन्दते।शिश्विन्दे १० व
दि अभिवादनस्तुत्योः।वन्दते।ववन्दे ११ भदि कल्याणे सुखे च।भन्दते।बभन्दे १२ मदि
स्तुतिमोदमदस्वप्नकान्तिगतिषु।मन्दते।ममन्दे।१३ स्पदि किंचिच्चलने।स्पन्दते
पस्पन्दे।१४ क्लिदि परिदेवने।शोके इत्यर्थः।सकर्मकः।क्लिन्दते।चैत्रम्।चिक्लि
८ न्दे १५ मुद हर्षे।मोदते।१६ ददँ दाने।न शसददवादिगुणानाम्।शसेर्ददेर्वका
रादीनां गुणशब्देन भावितस्य च योऽकारस्तस्य एत्वाभ्यासलोपौ न।ददृदे।ददृदा
ते।ददृदिरे।१७ ष्वद ष्वर्द आस्वादने।अयमनुभवे सकर्मकः।रुचावकर्मकः।धात्वा एम
देः षः सः।।धात्वादेः षस्य सः स्यात्।।सात्पदाद्योः इति षत्वनिषेधः।अनुस्वदते।सस्व १२
दे।स्वर्दते।सस्वर्दे।१८ उर्द माने क्रीडायां च।उपधायां च।।धातोरुपधाभूतयोरेफ

मे लोऽनंत्रति घात्तः॥ गाधृ ते। ७। ना पुनगाधृया श्रोपनापे स्वर्णा हीःषु॥ गाति वितव्य
रूति ग्राच वा मम॥ ग्रस्या शिष्ये वाले ने प दं स्या त॥ नापते। अन्यत्र नोपति। नाधते
७ दध धारणे। दधते। अतएकहल्मध्ये नादेशा देर्लिटि। लिटि एत्वमित्ता देशादि
कं न भवति यद्ऽं तद् वपनवस्या संयुक्तहल्मध्य स्था स्याकारस्ये त्वं स्यादभ्यास लो
पश्च किति लिटि। थलि च सेटि। धायुके स्यात्। आदेशश्चेह वे तू पसंपादकाएवा
श्रीयते। शासि दद्योः मति बध वचनादत्रापकात्। नेनस्र क्रति तश्चेगेतुसस्व
पिएत्वा भ्यासलोपो न स्यात्। देघे। देधाते। देधिरे। अत्तः किम्। दिदिवतुः। तपरः किं
ररासे। एकेत्यादि किम्। ततसरतुः। अनादेशादेः किम्। चकणतुः। लिडादेशाविं
शेषणादि हस्यादेवं नेमिच। सेदे। तदुरित्याप्रकृतौ। आपत्र च गम्। न्त्व नमुद्ध

सि०कौ०

१३ श्लाघायाम्। कस्यते ३१ एधादयोऽनुदात्ता नेतो गताः॥ अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः
अत सातत्यगमने। अतति। अत आदेः। आत। आततुः आतुः। इडित् आतिस्ईईटि। इति स्थिते॥
इट ईटि। इटः परस्य सस्य लोपः स्यादीटि परे॥ सिज्लोप एकादेशे सिद्धो वाच्यः। आतीत्
आतिष्टाम्। आतिषुः। वदव्रजहलन्तस्याचः॥ वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृ
द्धिः स्यात् सिचि परस्मैपदेषु॥ इति प्राप्ते नेटि। इडादौ सिचि प्रागुक्तं न स्यात्। मा भवा
नतीत्। अतिष्टाम्। अतिषुः। ३८ चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टाम्
अचेतिषुः। ३१॥ च्युतिर् आसेचने। सेचनमार्द्रीकरणम्। आङीषदर्थेऽभिव्याप्तौ च। इ एम
र इत्संज्ञा वा स्यात्। च्योतति। चुच्योत। इरितो वा। इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदे १२

वकारयोः हल्परयोः परत इकोर्दीर्घः स्यात्॥ ऊर्दते। ऊर्दी च्चञ्के। १० कुर्द खुर्द गुर्द गुद क्रीडायामेव। कूर्दते। चुकूर्दे। खूर्दते ११ गूर्दते १२ गोदते। जुगुदे। १४ षूदत्तरणे। सूदते। सुषूदे सेकः। स्त्र पृस्त स्त मज स्त सृत्या न्ये दन्तजने मादयः॥ एकाचः षो पदेशाः ष्वष्क स्विद स्विद स्वञ्ज स्वप श्मिङः। दन्त्यः॥ केवलदन्त्यः॥ ननुदनोष्ठु ञोपि ष्वष्कादीनां प्रपग्रहणान्नोपकारः॥ ह्राद अव्यक्ते शब्दे। ह्रादते। जह्रादे १६। ह्रादी सुखे च। चादव्यक्ते शब्दे॥ ह्रादते। १७ स्वाद आस्वादने। स्वादते। १८ पर्द कुत्सिते शब्दे। गुदरवे कुत्सपर्दः। पर्दते १९ यतीप्रयत्ने। यतते। २० युतृ जुतृ भासने। योतते जुयुते। जोतते। जुजुते २१ विथृ वेथृ याचने। विविथे। विवेथे। २२ श्रथि शैथिल्ये। श्रन्थते। २३ ग्रथि कौटिल्ये। ग्रन्थते। २६ क. १॥

14

सि०कौ० १४

लम्बनाविदूर्य्ययोः॥ अवात्स्तम्भेरेतयोरर्थयोः षत्वं स्यात्॥ वेश्च स्वनो भोजने। व्य
वाभ्यां स्वनतेः षः स्यात् भोजने॥ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्॥
परिनिविभ्यः परेषामेषां सस्य षः स्यात्॥ निषेधति। प्राक्सितादड्व्यवायेऽपि। सेव
सितेत्यत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षः स्यात्। न्यषेधत्
न्यषेधीत्। न्यषेधिष्यत्। स्थादिष्वभ्यासेन चाभ्यासस्य। प्राक्सितात्स्थादिष्वभ्यासेन व्यवा
येऽपि षत्वं स्यात्। एषामेवाभ्यासस्य न तु सुनोत्यादीनाम्। निषिषेध। निषिषिधतुः॥ से
धतेर्गतौ॥ गत्यर्थस्य सेधतेः षत्वं न स्यात्॥ गङ्गामभिसेधति। ध० षिधू शास्त्रे माङ्गल्ये च। शास्त्रं
शासनम्॥ सेधति सिषेधति सिषेधति सिधू शब्दे तोवा॥ सदादेर्वा स्यादेर्हृदि सिध्य परस्मै लादेरादेः

राम १४

परे ॥ अश्चुतत् । अश्चोतीत् ॥ ६० श्चुतिर् क्षरणे । श्चोतति । चुश्चोत । अश्चुतत् । अश्चोतीत्
अकाररहितोऽप्ययम् । श्चोतति ॥ ६१ मन्थ विलोडने । मामुद्रः किदाशिषीति किस्वादित्ति दि
तामिति न लोपः । मथ्यात् ॥ ६२ कुन्थि पुन्थि लुथि हिंसासंक्लेशनयोः ॥ इदित्वान्न लोपो
न । कुन्थ्यात् । मन्थ्यात् ॥ ६३ षिधु गत्याम् । सेधति । सिषेध । असेधित् । असेधीत् । सान्मदा
धोरिति नि षेधमाने । उपसर्गात्सुनोति सुवति स्यति स्तौति स्तोभति स्थासेनयसेध
सिचसञ्जस्वञ्जाम् । उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात् । सदिरप्रतेः । प्रतिभिन्ना
दुपसर्गात्सदेः सस्य षः स्यात् । स्तम्भेः । स्तम्भेः सौत्रस्य सस्य षः स्यात् । पोगमि ॥ ग
गजनार्थः । किञ्च । अभ्यासे चेति नानुवर्तते । वा कृत्रिमजिष्ठमेवावचेत् मन्तुः ॥ नथा २

सि॰कौ॰ वदस्थैर्ये। पवर्गीयादिः। वदति। ववाद। वेदतुः। वेदिथ। ववाद। ववद। अवादीत्। अ
१५ वदीत्। गद व्यक्तायां वाचि। गदति। जगाद। नेर्गदनदपतपदघुमास्यतिहन्ति-
यातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। उपसर्गस्थान्निमि-
त्तात्परस्य नेर्णः स्यादङ्गदादिषु परेषु। प्रणिगदति। रद विलेखने। विलेखनं भेदनं
रराद। रेदतुः ४ ३। णद अव्यक्ते शब्दे। णो नः। धात्वादेर्णस्य नः स्यात्। णोपदेशास्त्वन-
र्द्दनाटिनाथ्नाध्नन्दनक्कनॄनृतः। नाटेः सर्वे हैः स पर्युदासान्न घटादिर्णोपदेश एव। त [illegible]
वर्गचतुर्थान्तनाधतेर्नन्दिं घोष्ट्रा के स्योपदेशत्वमाहुः॥ उपसर्गादसमासेपि णो- १५
पदेशस्य। उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमा

वि

नु मे

धातुकस्येड्वा स्यात्। अघसत्। धोर्धि धः। ऊदः परलो स्तथोर्द्धः स्यात्न दधातेः। जक्षम्। जिंदासि
।घेधिष्य। घेद्धा। घेधिता। घेत्स्यति। घेधिष्यति। असेत्स्यत्। ..लोहलि। हलः परस्य स
स्य लोपः स्यात् लि। असेद्धाम्। असैत्सुः। असैत्सीः। असैद्धम्। असैद्ध। असैत्स्म। अ
सैत्स्व। असैत्स्म। पक्षे असेधीत्। असेधिष्टाम्। इत्यादि ४८ खाद भक्षणे। अकार इ
त्। खादति। चखाद ४९ खद स्थैर्ये हिंसायां च। चाद्धसणे। ... स्थैर्ये: केसेकः। ख
दति। अत उपधायाः। उपधाया अतो वृद्धिः स्यात् ञ्णिति प्रत्यये परे। चखाद। एलु
त्तमे वा। उत्तमे णल्वा णित् स्यात्। चखाद। चखद। अतो हलादेर्लघोः। हलादेर्ल
घोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्। अखादीत्। अखदीत्। ५०

16

सि०कौ० १६

हूनि ६५। णिदि कुत्सायाम्। निन्दति। प्रणिन्दति। ६७ टुनदि समृद्धौ। आदिर्ञिटुडु
वः। उपदेशे धातोराद्या एते इतः स्युः। नन्दति। टुशब्दो नलोपोन। नन्द्यात्। ६८ च
दि आह्लादे। चन्दति ६९ त्रदि चेष्टायाम्। त्रन्दति ७० कदि क्रदि क्लदि आह्वाने रो
दने च। कन्दति। ७१ क्रन्दति ७२ क्लन्दति ७३ क्लिदि परिदेवने। क्लिन्दति। ७४ शुन्ध
शुद्धौ। शुन्धति। नलोपः। शुध्यात्। ७५ अथ कवर्गीयान्ताः। अत्र नुदात्तेतो द्विचत्वारिं
शत्। शीकृ सेचने। गत्यर्थादिः। इन्याहुरित्येके। शीकते। शिशीके। ७६ लोकृ दर्शने राम
ने। लोकते। लुलोके। ७७ श्लोकृ संघाते। संघातो ग्रन्थः। सत्तेह ग्रथ्यमानस्य व्यापारो ग्र १६
थितुर्वा। आद्ये कर्मको द्वितीये सकर्मकः। श्लोकते। ७८ द्रेकृ ध्रेकृ शब्दोत्साहे

सेपि॥ घृणा इति॥ घृतिनदति ४४ अर्दगतौयाचनेच। अतअदेः। तस्मान्नुडि्हलः॥
हिहलोधातोर्दीर्घादृतोदकारात्परस्यनुट्स्यात्॥ आनर्द। आर्दीत्। ४५ नर्दगर्दशब्दे।
णोपदेशत्वाभावान्नणः। प्रनर्दति। गर्दति। ४६ तर्दहिंसायाम्. तर्दति। ४८ कर्दकुत्
सितेशब्दे। कुत्सितेकोष्ठे। कर्दति। ४९ खर्दखर्दने दन्दशूके। दंशहिंसादिरूपायांदन्दशूके
या क्रियापामित्यर्थः। खर्दति। ५० अतिअदिबन्धने। अन्तति। आनन्त। अन्दति।
आनन्द। ५१ इदिपरमैश्वर्ये। इन्दति। ५२ बिदिअवयवे। पवर्गतृती
यादिः॥ बिन्दति। अवयवंकरोतीत्यर्थः ५३ भिदीतिपाठान्तरम्। ५४ गादिवदनैक
नैकदेशे। गाडति। अनम्पादयःप अन्तेनलिङ्विधयाइतिकाशपः। अन्तति। उन्मपी

सि०कौ० अत्र नन्दीयं दस्रादिश्लोके । लघि भोजननिवृत्तावपि १०५ अघि वघि मघि गत्याक्षे प
१७ पे ।। आक्षेपो निन्दा ।। गतौ गत्यारंभे चेत्यन्ये । अंघते । आनंघे । वंघते । मंघते । मघि
कैतवे च १०७ राघृ लाघृ द्राघृ सामर्थ्ये । राघते । ध्राघृ इत्यपि केचित् । द्राघृ
आयामे च १०८ श्लाघृ कत्थने । श्लाघते १०९ अथ परस्मैपदिनः । ५० पंचाश
त् । फक्क नीचैर्गतौ । नीचैर्गतिर्मन्दगमनं असद्व्यवहारश्च ।। फक्कति ११० तक
हसने । तकति । १११ तकि कृच्छ्रजीवने । तंकति ११२ बुक्क भषणे । भषणं श्वरव
वुः । बुक्कति । ११३ कखे हसने । प्रतिकखति । ११४ ओखृ राखृ लाखृ द्राखृ ध्राखृ १७
शोषणालमर्थयोः । ओखति । ओखांचकार ११५ शाखृ श्लाखृ व्याप्तौ । शा

यो: उत्साहो दृढ्रैरोद्यमश्च । दिढ्रके । दिधेके । ८० रक्षणं कायाम् रेकते ८१ सेकृ स्रेकृ
स्रकि श्रकि श्लकि गतौ । त्रयोदश्मादयः । ढौकृ लक्ष्यादौ । अथोपदेशात्वान्नत्वः । हिंसके
८२ शकि शंकायां । शशंके । ८३ अकि लक्षणे । अंकते ८४ वकि कौटिल्ये । वंकते ८
५ मकि मण्डने मंकते । ८६ कक लौल्ये । लौल्यं गर्वश्चापल्यं च । चकके । ८७ कु
कव कक्ष्मादाने । कोकते । चुकुके । अद्युपधश्वो लिटः किन्त्वं गुणानूर्ध्वे विप्रतिषेधे
न । चुकुके । ८८ । चकते मो प्रति घातेन । चकते । चेके । ८९ ककि वकि श्वकि त्र
कि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः । कंकते
ढुढौके । तुत्रौके । सुष्वष्कानुष्ठित्व सकारोनास त्वच्यतिरेषोवसमपः ॥ ष्वष्कते । वस्कते

सि॰को॰ ष्टक्रुतेनतारोदीर्घः। वाणींदांगंवलोपइतिमायान।। पुरत्नाच्च। ऊंदति। वद्वदनुः।
१८ वंदति। मेदनुः। चगाकेमूने १६२ मुगिजृगिवृगेवर्जने। पुंगति। १६५ द्दनुदे स
ने। घघति। जघाघ १६५। मघमण्डने। १६६ शिघिश्राघ्राणे। शिघति १६७ ...
पञ्चवर्गीया नाः। तत्रान्त्यदांतेनएकविंशतिः। तूर्वदीमो। वर्वने १६८ सचसेच
ने मेवनेच। सचते। सेचे। सविता। १६९ लोचदर्शने। लोचते। लुलोचे १७० शचवच
कायांवाचि। शेचे १७१ श्वचश्वनिगतौ। श्वचते। श्वंचते १७२ कचवंधने। क
चते। १७४ कचिकाचिदीप्तिबंधनयोः। चकांचे। मचमुचिकल्कने। कल्कनं दम
दम्भः। शाठ्यंच। कथनमनित्यन्ये। मेचे। मुमुचे। मचिधारणोछ्रायपूजने १८

18

खति १२५ उखट खिवखवखि मखमखिणखिमखिरखरखिलखला खि
मूखवृखि ईखवलातगिलंगिस्त्रगिवगिमगितेगिनगिछ्रगिस्नगिडगिरिगि
लिगिगत्यर्थाः ॥ कवर्गद्वितीयान्ताः १२५ पञ्चादशा नतीयान्ता ह्वयादश ॥ इह
ता केषुरि खत्र खत्रि खिखि खिरूस्य पिष्टेतुरः केचित्स्मृठन्ति ॥ अभ्यासस्यासव
र्णे ॥ अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तः सवर्णेऽचि उवोरव ॥ सन्निपातपरि
भाष्यादुज्जादेरित्याम्नाः ॥ ऊखतुः ॥ ऊखुः ॥ इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणा
दूखः प्राप्तोनभवति ॥ सकृत्प्रवृत्तत्वात् ॥ आंगत्वाद्विपर्य्ये नवक्लृप्तत्वणप्रत्व, मा

सि.कौ गतौ नलोपः। पूजायां तु। अञ्चिता। १९४ वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु
१९ म्लुचु गत्यर्थाः। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुञ्चीत्। अम्लु[illegible]
जृस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च। च्लेरङ् वा स्यात्। अम्रुचे
त्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। १०१ ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे॥
जुग्रोच। अग्रुचत्। अग्रोचीत्। जुग्लोच। अग्लुचत्। अग्लोचीत्। अकोजीत्।
अखोजीत्। ग्लुञ्चु षस्ज गतौ। अग्लुचत्। अग्लुञ्चीत्। सस्ज इति सस्य श्चुत्वेन शः
। जश्त्वेन जः। सज्जति। अयमात्मनेपद्यपि। सज्जते। २ गुजि अव्यक्ते शब्दे। गुं राम
जति। गुञ्ज्यात्। [illegible] अर्च पूजायाम्। आनर्च। १ म्लेच्छ अव्यक्ते शब्दे। अस्फु १९

षु। मम च्चेपविपयुक्तिकरणे। प .... च्चते। १८० ष्टुच प्रसादे। ष्टोचते तुष्टचे। १८१ अम
जे गति स्याममाज्ज्जेने पान्जेनेषु। अ ज्जते। टुडु क्षिवो अकारैकदेशो रेफाह ल्ले नगा।
स्वते तेन हिह लल्लानुर॥ आन जे १८२ अ जिम जी भज्जेने। कंजते। उपसर्गाद
तीति वृद्धिः प्रा ज्जेते। कं तां चञ्के। आज्जिषा भञ्जेने। वम्रू जे। अभजिष्ट १८४ ए
ज कंपने जभ्यजदीचे ॥ एज्जा चक्रे १८७ ई ज गति कुत्सन योः ई जा चक्रे। १८८ श्चे
ष्व हिंसा शतिर्भे ज्यन्ताः परस्मैपदिनः। शुच शोके। शोचति १८९ कुच शब्दे तारे
कोचति १९० कुञ्च कुञ्च कौटिल्याल्पीभावयोः। अनिदितामिति नलोपः। कु च्यात
१९१ कुञ्चात्। १९२ लुञ्च अपनयने। १९३ अं च गतिपूजनयोः। अंच्यात् ॥

सि॰कौ॰

१० ति॥ ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ॥ ध्रजति। ध्रंजति। धर्जति। धृंजति॥ ध्वजा जित्य

ध्वंजति॥ कूज अव्यक्ते शब्दे॥ चुकूज॥ अर्ज षर्ज अर्जने॥ अर्जति॥ आनर्ज ३०

सर्जति। ससर्ज। गर्ज शब्दे। गर्जति॥ तर्ज भर्त्सने। तर्जति। कर्ज व्यथने। चकर्ज। खर्ज

कूजने च। चखर्ज। अज गतिक्षेपणयोः॥ अजति। अजेर्व्यघञपोः। अजते वी इत्यु

यमादेशः स्यादार्द्धधातुकविषये घञपं वर्ज्यते। लादावार्द्धधातुके वेष्यते।

विवाय। विव्यतुः। विव्युः॥ अत्र वकारस्य हल्परत्वात्॥ उपधायाश्चेति दीर्घे प्राप्ते॥ अचः एम

परस्मिन्निति स्थानिवद्भावेन अपरत्वम्॥ न पदान्तेति निषेधः॥ स्वरदीर्घयलोपेषु लो १०

पाजादेशएव न स्थानिवदित्युक्तेः॥ धालिताकाज त्र इति निषेधप्राप्ते॥ कुत्सम वृत्तु

टे अपशब्दे चेत्यर्थः। म्लेच्छति। मि म्लेच्छ ११ लृच्छला। च्छलत्तले। ललच्छ। ललांच्छ
र वाञ्छि इच्छायाम्। वांछति। आञ्छि आयामे। आंछति। आतआंछ इत्यत्र तपरक
रणे ज्ञापनार्थं कहू सपरिग्रहार्थम्। तेन दीर्घाभावान्नुट्। आंछ। तपरकरणं मु
खसुखार्थमिति मत्तेनुटृ। आनांछ। ह्रीछ लज्जायाम्। जिह्रीछ। हुर्छा कौटि
ल्ये। कौटिल्यमपसरणमिति मैत्रेयः। उपधाया अ इति दीर्घः। हूर्छति। मुर्छा मोह
समुच्छ्राययोः। मूर्छति। स्फुर्छा विस्तृतौ। स्फूर्छति। युच्छ प्रमादे। उछि उंछे
उंछः कणश आदानं कणिशाद्यर्जनं शिलमित्यादवः।। उंछति। उ
च्छकारा। उछी विवासे। विवासः समाप्तिः।। प्रायेण यं विपूर्वः।। युः त।।

सि॰कौ॰ भारद्वाजनियमोनि वर्त्तकः॥ अनन्तस्येतिन्यायात्॥ विवयिथ। विवेथ। आजिथ॥
२१ विव्यथुः॥ विव्य॥ विवाय। विवय। विव्यिव। विव्यिम॥ वेता। अजिता। वेष्यति।
अजिष्यति॥ अजतु। आजत्। अजेत्। वीयात्। सिचिवृद्धिःपरस्मैपदेषु॥ हलन्तांग
स्यवृद्धिःस्यात्परस्मैपदेपरेसिचि॥ अवेषीत्। आजीत्। अवेष्यत्। आजिष्यत्॥
तेजपालने। तेजति। खजमंथे। खजति। खजि गतिवैकल्ये। खंजति। एज कंपने।
एजांचकार॥ ४७ टुओस्फूर्जा वज्रनिर्घोषे। स्फूर्जति। पुस्फूर्ज। क्षि क्षये। अकर्म
कः। अन्तर्भावितण्यर्थस्तु सकर्मकः। क्षयति। चिक्षाय। चिक्षियतुः॥ चिक्षियुः। चि एम
क्षयिथ। चिक्षेथ। चिक्षियिव। चिक्षियिम। क्षेता। अकृत्सार्वधातुकयोर्दीर्घः॥ क्षज। २१

स्तुद्रुस्रुश्रुवो लिटि॥ एभ्यो लिट इट् न स्यात्॥ आद्यानां चतुर्णां ग्रहणं नियमार्थम्॥ प्रकृत्याश्रयः प्र
त्ययाश्रयो वा ययोर्निषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति॥ तत्र श्रुचतुर्णां थ
लि भारद्वाजनियमप्राप्तस्य वृञादिषु क्रादिनियमप्राप्तस्य वेटो निषेधार्थम्॥ अच
स्तास्वत्थल्यनिटो नित्यम्॥ उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इट्
न स्यात्॥ उपदेशेऽत्वतः॥ उपदेशे अकारवतस्तासौ नित्यानिट् ततः परस्य थल इट् न
स्यात्॥ ऋतो भारद्वाजस्य॥ तासौ नित्यानिट् ऋदन्तादेव थलो नेट् भारद्वाजस्य मते।
न॥ तेनान्यस्य स्यादेव॥ अथ यमन्त्रसंग्रहः॥ अत्र नोकारवांश्चक्तास्यनिट् यः स वेड्यं
ऋदन्त ऊदृदन्तः नित्यानिट् क्राद्यन्यो लिटि सेट् भवेत्॥ नचैवं स्तुद्रादीनामपि थलि विक
ल्पः शंक्यः॥ अचस्तास्वदिति उपदेशे त्वत इति योगद्वयप्राप्तिनिषेधस्य

सि॰ कौ॰
२२

कंठते २७० मुठि पालने। मुंठते। हेठ विबाधायाम्। विबाधाशाठनम्। जिहेठे। ए॰ स्व। अङ्क
चक्रे। हिडि गत्यनादरयोः। हिंडते। जिहिंडे। हुडि संघाते। जुहुंडे। कुडि दाहे। वडि ...
वेष्टने। मडि च। भडि परिभाषणे। परिहासः सनिन्दोपालम्भश्च परिभाषणम्। पिडि संघा-
ते १८० मुडि मार्जने। मार्जनं शुद्धिः। ... ॥ तुंडते। तुडि तोडने॥ तोडनं दारणं हिंस
न॰ च। तुंडते। हुडि वरणे। वरणं स्वीकारः। हरणे इत्येके। चडि कोपे। शडि रुजायां सं-
घाते च। तडि ताडने। पडि गतौ। कडि मदे। खडि मंथे। हेडृ होडृ अनादरे। जिहेडे १९० जु-
होडे। वाडृ आप्लाव्ये। वृत्तादिः आप्लाव्यम् आप्लवनं वा। बाडते। द्राडृ ध्राडृ विशरणे। शाडृ। राम
श्लाघायाम्। अथ आटवर्गीयान्ताः परस्मैपदिनः। शौटृ गर्वे। शौटति। पृ शौट २२

णोंगस्यदीर्घः स्यात्तयासौ त्रत्ययेपरे नतुकसार्वधातुकयोः॥ तीयात् । अदैम्योत् । तीज अव्यक्ते शब्दे
कूजिना सहायं पाठेतुं पुक्तः॥ विस्तीज । लज लजि भर्जने । लाज लाजि भर्त्सने च । जज जजि युद्धे
तुज हिंसायाम् । तोजति । तुतोज । तोजिता १५० तुजि पालने । गज गजि गृज गृजि मुज मुजि
शब्दार्थाः॥ गज मदने च ॥ व्रज व्रज गतौ । वद अजेति वृद्धिः । अव्राजीत् । अट पट वेगे का नाः
शाड्यना अनुदात्तेतः कट निंकृत् ॥ अट्ट अति क्रमहिंसयोः । दोपधोऽयम् । तोपध इत्येके ।
अट्टते । आनट्टे । १६० वेष्ट वेष्टने । विवेष्टे । चेष्ट चेष्टायाम् । अचेष्टिष्ट । गोष्ट लोष्ट संघाते॥
जुगोष्टे । लुलोष्टे । घट्ट चलने । जघट्टे । स्फुट विकसने । स्फोटते । पुस्फुटे । अठि गतौ । अ
ठते । आनंठे । वठि एकचर्यायाम् । ववंठे । मठि कठि शोके । शोकाहत्याध्यानम् । [illegible] ।

सि० कौ० डाञ्जो यमिमेके। उ। २०। चिट परप्रेष्ये। विट शब्दे। विट आक्रोशे। वयादिः। हिट पेके। इट कि
२३ ट कटी गतौ। एटति। केटति। ईकारः श्लोदितो निष्ठायामिति। तनष्टे धातुः। केचित्तु ईदितं॥
मत्वानुमि कृते। कंटती त्यादि। इवदन्ति इदित्तिमते कटीतिह्रस्वान्तः॥ अन्ये तु वट ई इति ४
क्लिष्टमान्नश्लेषाद्वृत्तुत्रयं। स्वयति। सूयाय। ईयतुः। ईयुः। इययिथ। इयाय। इययथ॥
४३ दीर्घस्यत्विजादेरिति नामि। अयं चकारेमादि उदाहरन्ति। मडि भूषायाम्। कुडि वैक।
ल्ये। कुण्डति। कुण्डल इति हलाहे गतम। मुड पुड मर्दने। ३३० चुडि अल्पीभावे। मुडि ख ठम
ण्डने। मुण्डति। पुडि चेत्येके। पुण्डति। रुटि लुटि स्तेये। रुण्टति। लुण्टति। रुठि लुठि इ २१
त्येके। रुडि लुडि इत्यपरे। स्फुटिर् विशरणे। इरित्वादङ् वा। अस्फुटत्। अस्फोटीत्। स्फु

यौ टृवन्धे। योटति। म्लेट्ट म्रेट्ट उन्मादे। द्वितीयोडान्तः टान्तमध्ये पाठस्तु पर्यसाम्यान्यायनिवृत्त्यै
म्लेटति। म्रेडति। कटे वर्षावरणयोः। चटे इत्येके। चकाट। शिवि अतोहलादेर्लघोरिति वृद्धौ
प्राप्तायाम्। ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्। इत्यनया नस्य हलणादेरपि न तस्य प्रवृत्तिरे
त्यभ्युद्धिर्नस्यादिदाशे सिध्यति। अकटीत्। इं अटपट गतौ। अटति। आटतुः। आटुः।
पपाट। पेटतुः। पेटुः। रट परिभाषणे। लट बाल्ये। शट रुजाविशरणगत्यवसादनेषु। व
ट वेष्टने। ववाट। ववटतुः। ववटुः। किट खिट त्रासे। शिट षिट। अनादरे। शेट
ति। शिशेट। शेटति। सिषेट। इं जट झट संघाते। भट भृतौ। तट उच्छ्राये। खट कां
याम्। णट नतौ। पिट शब्दसंघातयोः। हट दीप्तौ। षट अवयवे। लुट विलोडने।

सि॰कौ॰
२४ नो। तृतोऽड तड्डमेके। हुड्‌ हूड्‌ होड्‌ गतौ। हुड्यात्। हूड्यात्। होड्यात्। ३६०। रौडृ
रोडृ लोडृ उन्मादे। अड उद्यमे। अडति। आड। आडतुः। लड विलासे। लडति। लडयोरैक्य-
पोक्ष्येकत्वस्मरणाल्ललतीति सिद्धम्। कड मदे। कडति। कडि इत्येके। कण्डति।
गडि वदनैकदेशे। गण्डति। इति टवर्गीयान्ताः। अथ पवर्गीयान्ताः। तत्रानुदात्तेतः षो-
डश। ऋतुलिङ्गात्। तिपृ तेपृ ष्टिपृ ष्टेपृ ग्लेपृ क्षरणार्थाः। आद्योऽनुदात्तः। क्षीरस्वामी
स्वयं सेट्। तिपृ वभाम्। तेपते। तितिपे। कादिनियमादिट्। तितिपिषे। तेप्ता। तेप्स्यते॥ एम
लिङ्सिचावात्मनेपदेषु। इगन्तात् परो झलादी लिङ्सिचावात्मनेपदपरौ कितौ स्तः। ४५
तौ किलः। किन्त्वा गुणः। तिप्सीष्ट। तिप्सीयास्ताम्। तिप्सीरन्। अतिप्त। अतिप्सा-
तौ

२४

ढीत्यविकेचिन॥ रदि त्वानुम॥ स्कुंथति। पठ व्यक्तायां वाचि। पेठतुः। पेठुः। पेठिथ। अप
ठीत्। अपाठीत्। वठ स्थौल्ये। ववठतुः। मठ। ठप। मठ मदनिवासयोः। कठ कृच्छ्रजीवने। रठप
रिभाषणे ॥ हठ प्लुतिशठत्वयोः। बलात्कारे इत्येके। हठति जहाठ। रुठ लुठ उठ उपघाते।
औठति। ऊठे इत्येके। ऊठति। ऊठ। ओकार। पिठ हिंसासंक्लेशनयोः॥ शठ कैतवे च। शुठ
प्रतिघाते। शोठति। शुशोठ। शुठि। शुंठति। कुठि च। लुठि आलस्ये प्रतिघाते च। शुठि
शोषणे ॥ रुठि लुठि गतौ। रुंठति। चुडु भावकरणे। भावकरणम् अभिप्रायसूचनं।
चुड्डति। चुचुड्ड। अड्ड अभियोगे। अड्डति। आनड्ड। कड्ड कार्कश्ये। कड्डति। चुड्ड हेलः
चोदोपधाः॥ तेन क्विपि चुत् अत् कत्। इत्यादि। क्रीड विहारे। चिक्रीड। तुड तोडने

सि० कौ०
२५ श्रीमृ कल्पने। ष्ठी मते। चीभ्रवा। उंभ्रं। स्मृ आह्वे। रिभे। श्रमित् भी कविसदने [illegible]
र मते। ष्ठमि स्कमि प्राति बंधे। लंभते। उत्तंभते। उद्: स्थास्तंभो रिति पूर्वसव [illegible] वि
मते। लन् मो। निषव तु नुन भवति। ष वति। धोनि रिष्ट सो त्र से वन न्रग्रहणात्। त
द्री जन्तु स्वा स्तंभो रिति पवर्गीयो पध पाठ: स्तंभेरिति तवर्गीयोपध पाठ स्मेति मा
धव:। के चित्तु स्तकार श्रो पदेशि कंतु गकु:। तन्मते। ष्टंभते। ष्टभे। जभी जभि
गात्र विनामे। दषि जभोर च्चि। एत योर्नु मच् स्यात् अचि। जंभते। जजंभे। जंभि
ता। भ्रजं भिष्ट। जंभते। जजंभे। क्षल्भ कमने। शल्भ ल्भ। वल्भ भोजने। दन्त्यौष्ठ्योपदि:
वल्भ गल्भ धार्ष्टे। गल्भते। श्रंभु प्रमादे। तालव्या दिर्दत्या दिश्च। स्रंभते। ष्टुभु २५

तां । स्तिमिस्तृ । तितेपे । तितिष्टपे । तितिष्टपाते । तितिष्टपिरे । ३१० तिष्टेपे । तिष्टेपाते । ति
ष्टेपिरे । तेपृ कंपने च । ग्लेपृ दैन्ये । ग्लेपते । टुवेपृ कंपने च । वेपते । केपृ गेपृ ग्लेपृ च ॥
चालकंपनेगतौच । स्तिविभागाद्धि ति स्वामी । मैत्रेयस्तु ककारमन्तरेण पठित्वा कंपन इत्य
पेक्षन्त इत्याहुः । ग्लेपृ दैन्ये भेदात्पुनःपाठः । मेपृ रेपृ लेपृ गतौ । ३२० त्रपूष् लज्जायां ।
त्रपते ॥ तॄफलभजत्रपश्च ॥ एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि
सेटि थलि च । त्रेपे । त्रेपाते । त्रेपिरे । ऊदितो वा । त्रपिता । त्रप्ता । त्रपिषी ष्ट
त्रप्सीष्ट । कपि चलने । कंपते । चकंपे । रबि लबि अबि शब्दे । रम्बते । लम्बते । अ
म्बते । लबि अवस्रंसने च । कबृ वर्णे । चकबे । क्लीबृ अधार्ष्ट्ये । चिक्लीबे । सो ।२ ६

सि. कौ.
२६

पायांचकार। गोपायांबभूव। गोपायामास। जुगोप जुगुपतुः। ऊदित्वाद्वेट्॥ जुगोपि थ जुगोप्थ
गोपायिता। गोपिता। गोप्ता। गोपाय्यात्। गुप्यात्। अगोपायीत्। अगोपीत्। अगौप्
सीत्। धूप संतापे। धूपायति। धूपायांचकार। दुधूप। धूपायिता। जप जल्प व्यक्तायां वा
26 चि। जप मानसे च। चप सान्त्वने। षप समवाये। समवायः संबंधः। सम्यगवबोधो वा। सप
ति। रप लप व्यक्तायां वाचि। चुप मंदायां गतौ। चोपति। चुचोप। चोपिता। तुप तुंप त्रु
प त्रुंप तुफ तुंफ त्रुफ त्रुंफ हिंसार्थाः॥ तोपति। तुतोप। १७ तुम्पति। तुतुम्प। तुतुम्प
तुः। संयोगान्तस्य लिटः कित्त्वाभावान्न लोपो न। किदाशिषीति कित्त्वान्नलोपः। तुप् एन
यात्। पात्तुम्पतौ गवि कर्तरीति पारस्करादिगणे पाठात् सुट्। प्रस्तुम्पति गौः। स्ति २६

सं भे। लोभते। विष्टो भते। तुष्टुभे। व्यषेभिरः ३४० अथपरस्मैपदिनः। गुपूरक्षणे।
गुपूधूपविच्छिपणिपनिभ्य आयः। एभ्य आयः प्रत्ययः स्यात् स्वार्थे पुगन्तेति गु
णः। सनाद्यन्ता धातवः। सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः
स्युः। धातुत्वाल्लडादयः। गोपायति। आयादय आर्द्धधातुके वा। आर्द्धधातुकविव
क्षायामायादयो वा स्युः। कास्प्रत्ययादाममन्त्रे लिटि। कास्धातोः प्रत्ययान्ते
भ्यश्चाम् स्यात् लिटि। न तु मंत्रे। कास्यनेकाज्ग्रहणं कर्त्तव्यम्। सूत्रे प्रत्यय
ग्रहणमपनीयते। स्थाने अनेकाच्छब्द इति वाच्यमित्यर्थः। अतो लोपः। आर्द्धधा
धातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्द्धधातुके परे। गो॰

।सि०कौ० ...णे। घुम्णते। जुघुम्णे। घृम्णते। जघृम्णे। ...म्णे। जघृम्णे। घुण घूर्ण भ्रमणे। घोणते। घूर्ण-
२२ ते। [illegible]। पण व्यवहारे स्तुतौ च। पन च। स्तुतावित्येव संबध्यते। पृ-
थङ्निर्देशात्। पनि साहचर्यात् [illegible] पणेरपि। स्तुतौ वेगा यप्रत्ययः। अव्यवहारे तु। पणते। पे-
२७ णे। पणिते मा[illegible]रि। स्तुतावननुबन्धकस्य केवलेन चरितार्थत्वादायप्रत्ययान्तान्नात्मने-
पदम्। पणायति। पणायाञ्चकार। पेणे। पणायिता। पणितासे। पणायात्। प-
णि[illegible]ष्ट। पनायति। पनायाञ्चकार। पेने। भाम क्रोधे। भामते। बभामे। क्षमूष् सह-
ने। क्षमते। चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिध्वे। चक्षंध्वे। चक्षमिवहे। म्वोश्च। एम
मान्तस्य धातोर्नकारादेशः स्यान्मकारे वकारे च परे। णत्वम्। चक्षण्वहे। चक्षमिमहे। च २२

पानिर्दैण्याद्धिलुकि। न। भत्तोत्तुंपीति। त्रोपति। त्रुम्पति। त्रोफति। त्रोम्फति। त्रुम्फति। दुह
अ होहु पञ्चमर्थौच्चवीरे फौ। अप्रस्फोः। आद्याश्चत्वारः प्रथमान्ताः। ततो द्वितीयान्ताः
अष्टाव प्रकारान्ताः॥ पफर्फरफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब षर्ब धर्ब चर्ब गतौ।
आद्यः प्रथमान्तः ततो द्वितीयान्तौ। ततः कादश तृतीयान्ताः। द्वितीयतृतीयौ मुख्यौ सर्वे तेप
धाः॥ पर्पति। पर्पर्प। रफति। रंफति। ४३० अर्बति। अनर्ब। पूर्बति। लर्बति। बर्बति। कुवि आ
च्छादने। कुंवति। लुबि तुबि। अर्दने। लुम्बति। चुबि वक्त्रसंयोगे। बति। षूभ षुंभ हिंसा तुं
र्थौ॥ स्रम्भति। सस्रम्भ। सस्रम्भिता। स्रम्भाता। ससम्भ। स्रम्भाता। षिभु षिम्भु इत्येके। सेभति॥
सिंभति। शुभ शुम्भ भाषणे। भासने इत्येके। हिंसायामित्यन्ये। अथ षोनुनासिकान्ताः॥ तत्र
कम्पना आनुनासिकान्तो द्वौ। घिणि घुणि घृणि ग्रहणे। तुम्। घुत्वं॥ घिणते। जिघिणे

सि

सि०कौ०
१८ सार्वधातुकमात्रस्य विषयः॥ तथा चेयङ्हेरपवादः णायमा इयङ्। अजन्त सत ययए।
अदिदित्। गुणः। कारणादिङिः। कारकः। दीर्घः कार्यते। णौ चङ्युपधाया ह्रस्वः। चङ्।
परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात्। चङि। चङ्परे अनभ्यासस्य धात्ववयवस्यै
२४ काचः प्रथमस्य द्वे स्तोऽभ्यासे तु द्वितीयस्य॥ सन्वल्लघुनि चङ्परेऽनग्लोपे। चङ्परे रे
णि तुङ्गे आङ्गि सन्वदङ्गस्येति न ह्रस्व भ्यावर्तते। अङ्गसंज्ञानिमित्तं यच्चङ्परं णि इ
तियावत् तस्मिन्परे यल्लघु तत्परो योऽभ्यासस्तस्य सनीव कार्यं स्यात्। णावग्लो राम
दामांते डाप्प्रतिषेधोऽन्नंतयोः॥ हायनांते टापि प्राप्तेवचनम्॥ द्विदाम्नी॥ अवयवग्रहणा
न्नेह उद्दामा वडवा। अत्र डाप्प्रतिषेधाविपि नेष्टः॥ द्विहायनी॥ बाला। त्रिचतुर्भ्यां हायनस्य
णत्वं वाच्यम्॥ वयोवाचकस्यैव हायनस्य ङीप्णत्वे चेष्यते॥ त्रिहायणी। चतुर्हायणी
वयसोऽन्यत्र द्विहायना। चतुर्हायना शाला॥ नित्यं संज्ञाछंदसोः॥ अन्नंताद्बहुव्रीहेरुपधालो
पिनो ङीप् सुराज्ञी। नाम ग्रामः। अन्यत्र पूर्वेण विकल्प एव वेदे शतमूर्ध्नी पंचदाम्नी॥ केव
लमामकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च॥ एभ्यो नवभ्यो नित्यं ङीप् राम ७०
१३ स्यात्संज्ञाछंदसोः। भाषायां तु केवली विधिः मामकी भागधेयी पापी अपरी समानी॥

स्या आचिता। द्विकंबल्या। परिमाणान्तु॥ द्व्याढकी तद्धितलुकि किं॥ समाहारे पंचाढकी॥ कांडांता
त् क्षेत्रे॥ क्षेत्रे यः कांडांतो द्विगुस्ततो ङीप् न तद्धितलुकि। द्विकांडे प्रमाणमस्याः द्विकांडा॥ क्षेत्रभक्तिः
प्रमाणे द्वयसजितिविहितस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक्॥ क्षेत्रे किम्। द्विकांडी र
ज्जुः॥ पुरुषात्प्रमाणेऽन्यतरस्याम्॥ प्रमाणे यः पुरुषशब्दस्तदंताद्द्विगोर्ङीब्वा स्यात्तद्धितलुकि। द्वौ पुरु
षौ प्रमाणमस्याः सा द्विपुरुषी। द्विपुरुषा परिखा। ऊधसोऽनङ्। ऊधोंतस्य बहुव्रीहेरनङादेशः
स्यात् स्त्रियाम्॥ इत्यनङि कृते डाप्ङीब्निषेधेषु प्राप्तेषु॥ बहुव्रीहेरूधसो ङीष्॥ ऊधोंताद्बहु
व्रीहेर्ङीष् स्यात् स्त्रियाम्। कुंडोध्नी॥ स्त्रियां किम्॥ कुंडोध्नं धेनुकम्॥ इहानङ्पि नन्तो द्विधो स्त्रि
यामित्युपसंख्यानात्॥ संख्याव्ययादेर्ङीप्॥ ङीषोऽपवादः॥ द्व्यूध्नी। अत्यूध्नी॥ बहुव्रीहेरित्ये

सि॰कौ॰ ७१ हपतिः। गृहस्य पत्नी। अनुपसर्जनस्येति स्पष्टार्थमनुवृत्तमपि न पत्युर्विशेषणं किंतु तद
न्तस्य।। तेन बहुव्रीहावपि।। दृढपत्नी।। दृढपतिः। वृषलपत्नी।। अथ वृषलस्य पत्नीति व्यस्ते
कथमिति चेत्।। पत्नीव पत्नीत्युपचारात्। सूत्र।। आचारक्विबंतात्क्विपि।। अस्मिं
न्पक्षे पत्नियौ।। पत्नियद् इति पष्ठि सर्वेषि विशेषः।। सपूर्वस्य किं। गवां पतिः स्त्री।। नित्यं स
पत्न्यादिषु।। पूर्वविकल्पापवादः।। समानस्य सभावो निपात्यते।। समानः पतिर्यस्याः
सपत्नी।। एकपत्नी। वीरपत्नी।। पूतक्रतोरै च।। इयं त्रिसूत्री पुंयोग एवेष्यते।। पूतक्रत
तोः स्त्री पूतक्रतायी।। यया क्रतवः पूताः पूतक्रतुरेव सा।। वृषाकप्यग्निकुसितकुसिदा ७१
54 नामुदात्तः।। एषामुदात्त ऐ आदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपायी।। हरविष्णू वृषाक

आर्यकृती॥ सुमंगली। भेषजी। अन्यत्र केवला। इत्यादि। मामकं ग्रहणं नियमार्थं। अणंतत्वादे
देव सिद्धेः॥ तेन लोके ऽसंज्ञायां मामिका। अंतर्वत्पतिवतोर्नुक्॥ एतयोर्नुक्स्यात्। स्त्रियाम
म् न्नैति ङीप्। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते॥ तत्रांतरस्त्यस्यां गर्भ इति
विग्रहे॥ अंतःशब्दस्याधिकरणशक्तिप्रधानतया अस्तिसामानाधिकरण्याभावादप्राप्तो मतु
नु निपात्यते॥ पतिवत्नीत्यत्र तु वत्वं निपात्यते॥ अंतर्वत्नी। प्रत्युदाहरणं तु अंतरस्त्यस्यां शा
लायां घटः॥ पतिमती पृथिवी॥ पत्युर्नो यज्ञसंयोगे॥ पत्युर्नकारादेशः स्याद्यज्ञेन संबं
धे॥ वसिष्ठस्य पत्नी॥ तत्कर्तृकयज्ञस्य फलभोक्त्रीत्यर्थः॥ दंपत्योः सहाधिकारात्॥ वि
भाषा सपूर्वस्य॥ पतिशब्दांतस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः गृ

सि॰कौ॰
७१

अवदातशब्दस्तु नवर्णीगाची किंतु विष्णु ... आची॥ तेनावदातेऽप्येव॥ अन्यतोङी॥ ... तोपधाद
भिनाद्वर्णवाचिनो ऽनुदात्तान्तात्स्त्रियांङीप् स्यात्॥ कल्माषी॥ सारंगी॥ लघाव
तो ह्रस्वबहुव्रीहिगुरुरिति मध्योदात्तावितौ॥ अनुदात्तान्तात्किं। कृष्णा। कपिला॥ बहुरादि
भ्यश्च॥ बिडालोगौरादिभ्यश्चङीष्स्यात्॥ नर्तकी। गौरी। अनडुही॥ स्त्रियामामवाचः
अनडुही॥ पिप्पल्यादयश्च॥ आकृतिगणोयम्॥ सूर्यतिष्यागस्त्यमत्स्यानांयउपधा
याः॥ अंगस्योपधायायस्यलोपःस्यात्तद्धिते घे॥ सूर्याद्देवतायांचाप् वाच्यः॥ मत्स्यस्यङ्यांसूर्यागस्त्ययोश्छेचङ्यांच॥ तिष्यपुष्ययोर्नक्षत्राणि यलोपइतिवाच्यम्॥ मत्सी। मातरि
पितरि चेति पितृत्वादेवसिद्धेगौरादिषुमातामहीशब्दपाठादनित्यःपितामहीशब्दः। जानपद

राम
७१

५५

पीठमर्दः ॥ वृषाकपायी श्रीगौर्योरिति च अग्नायी कुसितायी कुसिदायी कुसिदशब्दे ह
स्वमध्योऽनुदीर्घमध्यः ॥ मनोरौ वा । मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्चावान्तादेशः स
न्नियोगशिष्टोऽपि च मनोः स्त्री मनावी मनायी मनुः । वर्णादनुदात्तात्तोपधात्तो नः ॥ वर्णवा
चीयोऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् तकारस्य नकारा
देशश्च । एना एनी रोहिणी वर्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः । त्रेत
एपाकृशलस्येति गत्यं । श्येनाश्व स्यादिति वृद्धौ हि । अनुदात्तात् किं । श्वेता । घाज्ञा दीनां
चैवं तो दानो यम ॥ अन्तह्नेवं । शितिः स्त्री । पिशंगादुपसंख्यानम् ॥ पिशंगी त्वरे वि
शेषः ॥ असितपलितयोर्न ॥ असिता । पलिता । छन्दसि क्नमेके ॥ असिक्नी । पलिक्नी ।

सि॰ कौ॰
७३

स्तुराहरणम्॥ कालीवर्णश्चेत्। कालान्या॥ नीली। अनाच्छादनं चेत्। नीलान्या। नीलस्या-
कायाटी। सर्थः॥ नीला अन्ये कम्बल्लन्॥ अनाच्छादनेपिन सर्वत्र किं तु नीलादौषधौ नीली
प्राणिनि च॥ नीली गौः। संज्ञायां वा॥ नीली नीला। कृशी। अयोविकारे अन्कुशान्या॥ कामु-
को मैथुनेच्छावे त्कामुका स्या॥ कवरो केशस्यन्निविशेष अ कबरान्या। चित्रेत्यर्थः॥ शोणात्
प्राचाम्॥ शोणी शोणा। वोतो गुणवचनात्॥ उदन्तात् गुणवाचिनो वाडीस्यात्॥ मृद्वी मृदुः।
उतः किं। शुचिः स्त्री। गुणेति किं। आखुः॥ खरु संयोगोपधात्॥ खरुः पतिंवराकन्या। पाण्डुः
बह्वादिभ्यश्च। गणभोवाडीस्यात्। बह्वी बहुः॥ कृदिकारादक्तिनः॥ रात्रिः रात्री॥ सर्वतोक्तिन्न-
र्थादित्येके॥ शकटी शकटिः। अक्तिनः सर्थात्किम्॥ अजननिः कृ नन्तानार्थप्रातीज्ञविधा
५८

राम
७३

कुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौ
ल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु॥ एकादशभ्यप्रातिपदिकेभ्यः क्रमाद्वृ
त्त्यादिष्वर्थेषु ङीष् स्यात्॥ जानपदी। वृत्तिश्चेत्। अन्या जानपदी॥ उत्सादित्वादञ् अंतत्वेन टि
ड्ढेति ङीप् प्राप्नुदात्तः। कुंडी। अमत्रं चेत्। कुंडान्या कुडि दाहे गुरोश्च हलः इत्यप्रत्ययः॥ यत्तु
अमतेर्डः कुंड इति मनुष्यजातिवाचिनस्तु ततो जातिलक्षणो ङीष्भवत्येव॥ अमत्रे इति द्वौ
विषया त्वाद्भामोढौ श्विधीयते॥ ननु नियमाते। गोणी। आवपनं चेत्। गोणान्या। स्थली अ
कृत्रिमा चेत्॥ स्थलान्या। भाजी श्राणा चेत्। भाजान्या। नागी स्थूला चेत्। नागान्या। गजवाचीना
गशब्दः स्थौल्यगुणयोगादन्यत्र यद्युक्तं उदाहरणम्॥ सर्पवाचीनु दैर्घ्यगुणादन्यत्र ममुक्तः

सि०कौ०
७४

ली उपाध्यायी। उपाध्यानी॥ या तु स्वयमेवाध्यापिका तत्र ङीष्वा वाच्यः॥ उपाध्यायी। उपाध्या
या। आचार्यादणत्वं च॥ आचार्यानी। पुंयोग इत्येव। आचार्या स्वयं व्याख्यात्री॥ अर्यक्ष-
त्रियाभ्यां वा स्वार्थे॥ अर्याणी अर्या स्वामिनी। वैश्या वेत्यर्थः क्षत्रियाणी क्षत्रिया। पुंयोगे
तु अर्यी। क्षत्रियी। कपं ब्रह्मणोणीति। ब्रह्माणमानयति जीर्यै वयती इति कर्मण्यण॥ क्री
तात्करणे पूर्वात्॥ क्रीतान्तादद्न्तात्करणादेः स्त्रियांङीष् स्यात्॥ वस्त्रक्रीती। क्वचिन्न
धनक्रीता। क्तादल्पाख्यायाम्॥ करणादेः क्तान्तादद्न्तान्ङीष् स्यात्॥ अल्पत्वे द्योत्ये॥
अभ्रलिप्ती द्यौः॥ बहुव्रीहेश्चान्तोदात्तात्॥ बहुव्रीहेः क्तान्तादन्तोदात्तादद्न्तान्स्त्रि- एम
यां ङीष् स्यात्॥ जातिपूर्वादिति वक्तव्यम्॥ नेह वस्त्रच्छन्ना सुकालसुखादिपूर्वान्न॥ ७४

57

र्यं पटुः इति शब्दोपि बह्वादिगणे पठ्यते। हिमकाषिहतिषु चेति पद्भावः पद्धतिः पद्धती। पुंयोगा
दाख्यायाम्। या पुमाख्या पुंयोगात्स्त्रियां वर्तते ततो ङीष् स्यात्॥ गोपस्य स्त्री गोपी। पालका
न्तान्न। गोपालिका अश्वपालिका॥ सूर्याद्देवतायां चाब्वाच्यः॥ सूर्यस्य स्त्री देवता सूर्या
देवतायां किम्। सूरी कुन्ती। मानुषीयम्॥ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवय
वनमातुलाचार्याणामानुक्॥ एषामानुगागमः स्यात् ङीष् च। इन्द्रादीनामानुक् मातुलाचार्ययोस्तु
पुंयोग एवेष्यते। तत्र ङीष्सिद्धे आनुगागममात्रं विधीयते इतरेषां चतुर्णामुभयम्॥ इन्द्रा
णी॥ हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी। अरण्यानी॥ यवाद्दोषे॥ दुष्टो यवो यवानी॥ य
वनाल्लिप्याम्॥ यवनानां लिपिर्यवनानी॥ मातुलोपाध्याययोरानुग्वा॥ मातुलानी मातु

सि०कौ०
७५

प्राणिस्थस्यापि प्राणिनि दृष्टत्वात्तेन चेत्तत्तथायुतम्॥ सुस्तनी सुस्तना वा प्रतिमा प्राणि
वत्प्रतिमायां सदृशोऽस्तीति स्वाङ्गत्वात्॥ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च॥ एभ्यो वा ङीष् स्यात् जङ्
घयोर्बह्वज्लक्षणो निषेधो बाध्यते पुरस्तादपवादन्यायात्॥ ओष्ठादीनां पञ्चानां तु
संयोगोपधादिति बाध्यते॥ मध्येऽपवादन्यायात्॥ सहनञ्लक्षणस्तु प्रतिषेधः परत्वाद
स्य बाधकः॥ तुङ्गनासिका। इत्यादि नेह सहनासिका। अनासिका। अत्र वृत्तिः। अङ्गगा
त्रकण्ठेभ्यो वक्तव्यः। स्वङ्गी। स्वङ्गा इत्यादि॥ एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमि
ति। केचित्॥ भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अत्र वार्त्तिकानि॥ पुच्छाच्च॥ सुपु
च्छी सुपुच्छा। कबरमणिविषशरेभ्यो नित्यम्। कबरं चित्रं पुच्छमस्याः सा कबरपुच्छी। इ ७५

58

डरूमिन्नी। नेह वहकृता जाताज्ञातन्ना। दन्नांजाना। पाणिगृहीतीभार्यायाम्। पाणीगृहीता
न्या। अस्वाङ्गपूर्वपदाद्वापूर्वणानिषेधप्राप्ते विकल्पोयम्॥ सुरापीनी। सुरापीता। अन्ते।
दाजातकिम्॥ वहूकृन्ना॥ अन्नोदादनादितुदात्तनिषेधः। अत एव पूर्वेणापिनङीष॥
स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्॥ असंयोगोपधमुपसर्जनंयत्स्वाङ्गंतदन्तात्प्राति
पदिकाद्वाङीष्स्यात्। केशानतिक्रान्तातिकेशी अतिकेशा। चन्द्रमुखी चन्द्रमुखा। संयोगोप
धात्तुसुगुल्फा। उपसर्जनात् किं। शिखा। शोभना शिखा सुशिखा। स्वाङ्गंत्रिधा। अद्रवंमूर्ति
मत्स्वाङ्गं प्राणिस्थमविकारजम्॥ सुस्वेदा द्रवत्वात्। सुज्ञाना अमूर्जत्वात्। सुमुखाशाला
अप्राणिस्थत्वात्। सुशोफा विकारजत्वात्। अतत्स्थंतत्रदृष्टंच सुकेशी। सुकेशा वा रथ्या। अ

सि॰कौ॰
७६

कृतिग्रहणा जातिः ॥ अनुगतसंस्थानव्यंग्येत्यर्थः ॥ नरी लिंगानां च सर्वभाक् ॥ सकृदा
ख्यातनिर्ग्राह्या ॥ असर्वलिंगत्वे सत्येकस्यां व्यक्तौ कथानाद्व्यक्त्यंतरे कथनं विनापि
सुग्रहा जातिरिति लक्षणांतरं । वृषली । तत्स्थं किम् ॥ शुक्ला । सकृदित्यादि किं । दे
वदत्ता । गोत्रं च चरणैः सह ॥ अपत्यप्रत्ययांतः शाखाध्येतृवाची च शब्दो जाति
कार्यं लभ तत्रस्यर्थः । औपगवी । कठी । बह्वृची । ग्रामसगौ मत्रे तु शार्ङ्गरवादिपाठात् । तन्त्री
नाडी खाध्यते । जातेः किम् ॥ मुण्डा ॥ अस्त्रीविषयात् किम् । बलाका । अयोपधात् किम् । क्ष राम
त्रिया । योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः ॥ गवयी ७६
हयी । मुकयी । हलस्तद्धितस्येति यलोपः ॥ मनुषी ॥ मत्स्यस्य ङ्याम् । मत्सी । पाकक

मादि॥ उपमानानि सामान्यवचनैः। नित्यमेव॥ प्र लूकपुसी। पशा लाउ लूकपु कीसेना। नकोः द्वादि
तद्धेः॥ कोऽसे दृष्टेच प्य स्वाङ्गच्चनडीपक स्पात॥ कोऽ॥ स्वे स्त्रीनामुः। कोऽ स्वाङ्गनिम्नाये
सुजघना॥ सहनञ्विद्यमानपूर्वाच्च॥ सहे नादिन्निक पूर्वा नडीष्यात्। सकेशा अकेशा विद्य
माननासिका॥ नखमुखात्संज्ञायाम्॥ नडीष्यात्॥ सूर्पणखा गौरमुखा। संज्ञायां किं॥ ता
म्रमुखी कन्या दिक्पूर्वपदान्ङीपाद्दिक्पूर्वपदात् स्वाङ्गान्तात् प्रातिपदिकोत्तरस्य ङीषोऽङी। वाहः
स्पात्। प्राङ्मुखी। प्राङ्मुखातं पदस्य॥ वाहः। वाहनान्तात्प्रातिपदिकान्ङीष्यात्। ङीषेवानुवर्तते
नडीपृष्ठि सदा दुमेरदिलोही नोमे। सख्येशिश्विति भाषायाम्॥ इति शब्दः स्त्रीकारे भाषायामिस
सानत्वे रेखा ङः॥ तेन कन्दस पिकचित्सरवी सखिशिवी आयेनवो धुनयन्नामशिश्वी॥ मातिर
द्वौ विषयाद्ध्यापयाजः॥ जातिवाचि यन्नतदविषयानि यजमयोपधात्तः॥ स्त्रियां ङीष्यात॥ न्ना

सि॰कौ॰
७७ वाकुः॥स्वादेकः। रज्जुः। हनुः। बाहुनात संज्ञायाम्। स्त्रियामूङ्॥ मद्रबाहुः। संज्ञा यां
किम्॥ वृत्तबाहुः। पंगोश्च। पंगूः। श्वश्रू। ॥ लोकादाकारस्तो पक्षे। चादूङ्। पुंयोग
लक्षणस्य ङीषोपवादः। लिंगविशिष्टपरिभाषयास्यादयः॥ ऊरूत्तरपद
सेोपम्ये। उपमानवाचिपूर्वपदमूरूत्तरपदं यस्मात्प्रातिपदिकं तस्मादूङ् स्यात्। करभो
रूः। संहितशफलक्षणवामादेश्च। अनोपम्यार्थं सूत्रम्। संहितोरूः। सेव शफोरूः।
शफौ खुरौ तावि वश्लिष्टत्वादुपचारात्। लक्षणशब्दश्चाभिन्ना। लक्षणोरूः। वामो
रूः। संहितसहाभ्यां चेति वक्तव्यम्। हितेन सह संहितौ सहितोरू जरूपसाः। सास
हितोरूः। सहतोरूः। सहोरूपस्याः। वामरूरुः। यद्वा विद्यमानवचनस्यसह। एक
७७

र्णपर्णपुष्पफलमूलवालोत्तरपदाच्च॥ पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादतङीष्स्या
त्॥ ओदनपाकी। शंकुकर्णी। शालपर्णी। शंखपुष्पी। दासीफली। दर्भमूली। गोवा
ली। ओषधिविशेषे रूढा एते। इतो मनुष्यजातेः॥ ङीष्स्यात्। दाक्षी। योपधादपि। उदमे
घस्यापत्यमौदमेघी। मनुष्येति किम्॥ तित्तिरिः॥ ऊङुतः॥ उकारान्तादयोपधान्मनुष्य
जातिवाचिनः स्त्रियामूङ् स्यात्॥ कुरूः॥ कुरुणा रेफोपधः। तस्य स्त्रियामवन्तो कुरु
नी स्यादितन्नानुक्तं। अयोपधात्किम्॥ अध्वर्युर्ब्राह्मणी। अप्राणिजातेश्चारज्ज्वादीनामु
पसंख्यानम्॥ रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव॥ अलाबूः। कर्कन्धूः। अनयोर्दीर्घान्त
त्वेपि ऊङ्ध्यायोरिति विभक्त्यनुमानान्तप्रतिषेध ऊङः फलम्॥ प्राणिजातेस्तु कृक

लिंगविशिष्टपरिभाषया सिद्धे तत्पुरुषाधिकारे उत्तरपदार्थे युवतिः। अनुपसर्जनादि
त्येव। हलो युवानो पसर्जनार्थे कृ युवा न गही। युवती तिसृ वोतेः। शत्रून् मा
प्रियो वधूम्। इति स्त्रीप्रत्ययाः॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा
॥ नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः॥ प्रातिपदि
कार्थमात्रे लिंगमात्राधिक्ये संख्यामात्रे च प्रथमा स्यात्॥ उच्चैः। नीचैः। कृष्णः। श्रीः।
ज्ञानम्। अलिंगा नियतलिंगाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्। अनि एम
यतलिंगास्तु लिंगमात्राद्याधिक्यस्य॥ तटः। तटी। तटम्। परिमाणमात्रे। द्रोणो १ ७८
व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः॥ प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभे

61

ऽस्य ऊर्ध्वतिरश्च प्रति पादत्ता पत्रपोगः॥ संज्ञायां कडुकमण्डल्वोः। संज्ञायां ह्रिय
मूढः स्यात्। कद्रूः। कमण्डलूः। संज्ञायां किं। म कद्रुः। कमण्डलुः॥ श्वश्रूच्छन्दो पर्व च।
नं। शार्ङ्गरवाद्यञो ङीन्॥ शार्ङ्गरवादेरञो ऽकारस्य ईनाजातिप्राचिनो ङीन्स्या
त्। शार्ङ्गरवी। वैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रम
नारी। यङश्चाप्। यङन्तात् स्त्रियां चाप् स्यात् मङ्ष्यङोः सामान्यग्रहणम्॥ आम्बष्ठ्यो
कौरोष्यं गं ध्यायाद्यन्तश्चास्याच्यः। पौतिमाष्या। अथाधाघा। अस्मा ख्यातः स्यात्। यत्र
श्चेति ङीपो ऽपवादः अवट्यश्चाप्रोगर्गादिः। अवट्या। तद्धिताः। आपञ्चम परिसमा
प्तेरधिकारोयम्। पूनक्तिः। पुंवन्नश्वाहृत्तिः ध्राम्पपः स्यात् स्त्रियां सवत्त हितसंत्रः

सि॰कौ॰
१९

तद्धितसमासैः॥ तिङः॥ हरिः सेव्यते। कृत्॥ लक्ष्म्या सेवितः। तद्धितः। शतेन क्रीतः शा-
त्यः शतिकः॥ समासः प्राप्तः आनन्दो यम्॥ प्राप्तानन्दः॥ क्वचिन्निपातेन। अभिधानं
यथा। विष। वृक्षोपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतम्॥ सांप्रतमित्यस्य हि युज्यत इ-
त्यर्थः। तथायुक्तं चानीप्सितम्॥ ईप्सिततमवत् क्रियया युक्तमनीप्सितमपि कार-
कं कर्मसंज्ञं स्यात्॥ ग्रामं गच्छं तृणं स्पृशति॥ ओदनं भुंजानो। विषं भुंक्ते। अकथितं
च॥ अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्॥ दुह्याच्पच्दण्डरु-
धिप्रच्छिचिब्रूशासुजिमंथमुषाम्॥ कर्मयुक् स्यादकथितम्॥ तथा स्यान्नीहृकृष्वहाम्॥
दुहादीनां द्वादशानां तथा नीप्रभृतीनां च चतुर्णां कर्मणा यद्युज्यते तदेवाकथि १९

62

देन संसर्गोणा। विशेष्याणाम्। अन्यथार्थमनुपरिच्छेद्यपरिच्छेदकभावेनान्वीहो विशेषणाग्नि
ति विवेकः॥ वचनं संख्या। एकः। द्वौ। बहवः। इहाकार्य्यत्वा। इमके एकादौ वचनम्। संबो
धने च। द्वहप्रथमा स्यात्॥ हे राम। हे रामौ। हे रामाः॥ कारके इत्यधिकृत्य॥ कर्तुरीप्सित
तमं कर्म। कर्त्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्॥ कर्त्तुः किम्। माषेष्वश्वं
बध्नाति। कर्मण ईप्सिता माषा न कर्त्तुः॥ तमप्ग्रहणं किम्। पयसा ओदनं भुंक्ते॥ क
र्मेत्यनुवृत्तौ कर्मण्ययुक्तं चाधारनिकृत्यर्थम्॥ अयम् ग्रामे गेहं प्रविशति। त्यत्रैव स्यात्। अ
नभिहित इत्यधिकृत्य। कर्मणि द्वितीया॥ अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति
अभिहिते कर्मणि तु प्रथमैव परिष्कारार्थमात्र इति प्रथमैव॥ अभिधानं तु प्रायेण तिङ्कृ

शि० कौ० ते॥ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ॥ गत्पृच्छेर्णानाश इ-

८१ कर्माकर्मकाणां च णौ कर्तृत्वेऽकर्मकः स्यात्॥ शत्रूनगमयत्स्वर्गं वेदार्थं स्वान्

वेदयत्॥ आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥ १॥ आसयत्सलिले पृथ्वीं यः

स मे श्रीहरिर्गतिः॥ गतौ त्यादि किम्॥ पाचयत्योदनं देवदत्तेन॥ अण्यन्तानां किं

गमयति देवदत्तो यज्ञदत्तम्॥ तमपरः प्रयुंक्ते॥ गमयति देवदत्तेन यज्ञदत्तं विष्णु-

मित्रः॥ नीवह्योर्न॥ नाययति॥ वाहयति भारं भृत्येन॥ नियन्तृकर्तृकस्य वहेर- राम

निषेधः॥ वाहयति रथं वाहान्सूतः॥ आदिखाद्योर्न॥ आदयति खादयति वान्नं ८०

बटुना॥ भक्षेरहिंसार्थस्य न॥ भक्षयत्यन्नं बटुना॥ अहिंसार्थस्य किम्॥ भक्ष-

63

तं कर्म इति॥ परिगणनं कर्तव्यमित्यर्थः॥ गां दोग्धि पयः॥ बलिं याचते वसुधाम्॥
अविनीतं विनयम्॥ याचते॥ तण्डुलानोदनं पचति॥ गर्गान् शतं दण्डयति॥ व्रजमव
रुणद्धि गाम्॥ माणवकं पंथानं पृच्छति॥ वृक्षमवचिनोति फलानि॥ माणवकं धर्मं
ब्रूते॥ शास्ति वा॥ शतं जयति देवदत्तम्॥ सुधां हरनिधिं मथ्नाति॥ देवदत्तं शतं मु
ष्णाति॥ ग्राममजां नयति हरति कर्षति वहति वा॥ अर्थनिबंधनेयं संज्ञा॥ बलिं भि
क्षते वसुधां॥ माणवकं धर्मं भाषते॥ अभिधत्ते वक्तीत्यादि॥ कारकं किं॥ माणव
कस्य पितरं पंथानं पृच्छति॥ अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्यो ध्वा
च कर्मसंज्ञक इति वाच्यम्॥ कुरून् स्वपिति॥ मासमास्ते॥ गोदोहमास्ते॥ क्रोशमा।

सि०कौ० ८१

सा ॥ अधिशीङ्स्थासां कर्म ॥ अधिपूर्वाणामेषामाधारः कर्म स्यात् ॥ अधिशेते । अधि-
तिष्ठति । अध्यास्ते वा वैकुण्ठं हरिः ॥ अभिनिविशश्च ॥ अभिनी इत्येतत्संघातपूर्वस्य वि-
शतेराधारः कर्म स्यात् ॥ अभिनिविशते सन्मार्गम् ॥ परिक्रयणे संप्रदानमितोऽत्र मण्डूकप्लु-
त्या ... अन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न ॥
पापेऽभिनिवेशः ॥ उपान्वध्याङ्वसः ॥ उपादिपूर्वस्य वसतेराधारः कर्म स्यात् ॥ उपवसति ॥ अ-
नुवसति । अधिवसति । आवसति वा वैकुण्ठं हरिः ॥ अभुक्त्यर्थस्य न ॥ वने उपवसति ॥ उभ- रामः
सर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ उभ- ८१
यतः कृष्णं गोपाः ॥ सर्वतः कृष्णम् ॥ धिक् कृष्णमभक्तम् ॥ उपर्युपरि लोकं हरिः ॥ अध्यधिलो-

64

यति बलिवर्दान्सस्यम्॥ जल्पतिप्रभृतीनामुपसंख्यानम्॥ जल्पयति भाषयति पुत्रं देवद-
त्तः॥ दृशेश्च॥ दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं। नतु तद्विशेषा-
णामित्यनेन ज्ञाप्यते तेन स्मरति जिघ्रतीत्यादीनां न। स्मारयति घ्रापयति देवदत्तेन। श-
ब्दापयति देवदत्तेन॥ धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात्सिद्धे। येषां देशका-
लादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः न त्वविवक्षितकर्माणोऽपि तेन मासमासय-
ति देवदत्तमित्यादौ कर्मत्वं भवत्येव देवदत्तेन पाचयतीत्यादौ तु न॥ हृक्रोरन्यतर-
स्यां॥ हृक्रोरणौ कर्त्ता णौ वा कर्मसंज्ञः स्यात् हारयति कारयति भृत्येन भृत्यं वा कटम्
अभिवादिदृशोरात्मनेपदे वेति वाच्यम्॥ अभिवादयते दर्शयते देवं भक्तेन भक्तं वा

सि.कौ. सम्बन्धेष्यपि:॥ भिन्नबंधनेक्त॥ हीने॥ हीने द्योत्ये ऽनुः प्राग्वत्॥ अनु हरिं सुराः॥ हरेर्हीना इत्य
८२ र्थः। उपोऽधिके च॥ अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्॥ अधिके सप्तमी वक्ष्यते
हीने। उप हरिं सुराः॥ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः॥ एषु विष
येषु प्रत्यादयः॥ उक्तसंज्ञाः स्युः॥ लक्षणे वृक्षं वृक्षं प्रति परि अनु वा विद्योतते वि
द्युत्॥ इत्थंभूताख्याने॥ भक्तो विष्णुं प्रति परि अनु वा॥ भागे। लक्ष्मीर्हरिं प्रति परि अनु वा
। हरेर्भाग इत्यर्थः। वीप्सायाम्। वृक्षं वृक्षं प्रति परि अनु वा सिंचति॥ अत्रोपसर्गत्वाभा एम
न्न षत्वम्। एषु किम्। परिषिंचति॥ अभिरभागे। भागवर्जिते लक्षणादावभिरुक्तसंज्ञः
स्यात्॥ हरिमभि वर्तते। भक्तो हरिमभि। देवं देवमभि सिंचति॥ अभागे किम्॥ यदत्र मम ८२
65

कं।। अणो, घो लोकं।। अभितः परितः समया निकषा हा प्रति योगे ऽपि। अभितः कृष्ण
परितः कृष्णं। ग्रामं समया मम्।। निकषा ग्रामम्।। हा कृष्णाभक्तं।। तस्य शोच्यता इत्यर्थः।।
बुभुक्षितं न प्रति भाति किंचित्।। अन्तरा अंतरे ण युक्ते। अपांयोगे द्वितीया स्यात्।। अन्त
रा त्वां मां हरिः।। अन्तरेण हरिं न सुखं।। कर्मप्रवचनीयुक्ते द्वितीया।। अनुर्लक्षणे। लक्ष
णे द्योत्ये ऽनुरुक्त संज्ञः स्यात्।। गत्युपसर्ग संज्ञापवादः।। कर्मप्रवचनीययुक्ते द्वितीया।।
एतेन संयोगे द्वितीया स्यात्।। जपमनु प्रावर्षत्।। हेतुभूत जपोपलक्षितं वर्षणमित्यर्थः
परापि हेतौ तृतीया। अनेन बाध्यते लक्षणेत्थंभूते त्यादिना सिद्धे पुनः संज्ञाविधानसाम
र्थ्यात्।। तृतीयार्थे। अस्मिन्नर्थे ऽनुरुक्त संज्ञः स्यात्।। नदीमन्ववसिता सेना।। नद्या सह

सि.कौ. जाहि ग्रामम् ॥ संभावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः अपि स्तुहि अन्ववसर्गः काम
८३ चारानुज्ञा धिग्देवदत्तम् अपि स्तुयाद्वृषलं गर्हा अपि सिंच अपि स्तुहि समुच्चये ॥
कालाध्वनोरत्यन्तसंयोगे ॥ इह द्वितीया स्यात् ॥ मासं कल्याणी । मासमधीते ।
मासं गुडधानाः । क्रोशं कुटिला नदी । क्रोशमधीते । क्रोशं गिरिः ॥ अत्यन्तसंयो
गे किम् ॥ मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥ स्वतन्त्रः कर्ता ॥ क्रियायां ।
स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ॥ साधकतमं करणम् । क्रियासिद्धौ प्र एम
कृष्टोपकारकं करणसंज्ञं स्यात् तमप्ग्रहणं किं गंगायां घोषः । कर्तृकरणयो ८३
स्तृतीया ॥ अनभिहिते कर्तरि करणे च तृतीया स्यात् रामेण बाणेन ह
66

म। अभि व्याप्त दीयतां मधु॥ गतिसंज्ञाबाधात् गतिर्गताविति निघातो न॥ सुः पूजायाम्॥ सुसिक्तम्
सुस्तुतं॥ अनुपसर्गत्वान्न षः॥ पूजायां किम्॥ सुषिक्तं किं तवात्र क्षेपोयम्॥ अतिरतिक्रम
णे च॥ अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयः स्यात्॥ अति देवान् कृष्णः॥ अपिः पदा
र्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात्॥ सर्पिषोपि स्या
त्॥ संभावनायां लिङ्॥ तस्या एव विषयभूते भवनेकर्तृदोर्लभ्यत त्रसुक्ष्मदोर्लभ्यं द्योतयप
न्नपिशब्दः स्यादित्यनेन संबध्यते॥ सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बि
न्दोरवयवावयव॥ विभावसंबंधे इयमेव ह्यपिशब्दस्य पदार्थद्योतकतामाम्र द्वितीयानु
नेहस्त्र वर्तते सर्पिषो बिन्दुना योगेन त्वपि नेत्युक्तं मात॥ अनुपसर्गत्वान्न षः॥ अपि स्तु

सि॰कौ॰
८४ अक्ष्णा काणमस्य। इत्थंभूतलक्षणे। कंचित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटा
भिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्टः। संज्ञोऽन्यतरस्यां कर्मणि। संपूर्वस्य जाना
तेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते। हेतौ। हेत्वर्थे तृतीया स्यात्। द्र
व्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनिय
तं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति। गम्यमा
नापि क्रिया विभक्तौ प्रयोजिका। अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधन
क्रियां प्रति श्रमः करणम्। शतेन शतेन वत्सान्पाययति पयः। शतेन परिच्छिद्य र्थः। इत्य
अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये तु ८४

67

तो वाली ॥ प्रकृत्यादिभ्य उपसंख्यानम् ॥ प्रकृत्या चारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समे
नैति विषमेनैति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन वा यातीत्यादि। दिवः कर्म्म च। दिवः
साधकतमं कर्म्मसंज्ञं स्यात् चात् करणसंज्ञम्। अक्षैरक्षान्वा दीव्यति। अपवर्गे तृतीया। अप
वर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्॥ अह्ना क्रोशेन वा
नुवाकोऽधीतः। अपवर्गे किं। मासमधीतो नायातः॥ सहयुक्तेऽप्रधाने। सहार्थेन युक्तेऽप्र
धाने तृतीया स्यात्॥ पुत्रेण सहागतः पिता। एवं साकं सार्द्धं समं योगेपि विनापि तद्योगं तृती
या॥ वृद्धो यूनेति निर्देशात्॥ येनाङ्गविकारः। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते त
तस्तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धि काणत्वविशिष्ट इत्यर्थः। अंगविकारः किं

त्थि। धारेरुत्तमर्णः। धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं ह
रिः। उत्तमर्णः किम्। देवदत्ताय शतं धारयति ग्रामे। स्पृहेरीप्सितः। स्पृहयतेः प्रयोगे
इष्टः संप्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किं। पुष्पेभ्यो वने स्पृहयति॥ ईप्सि
तमात्रे। इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा। पुष्पाणि स्पृहयति। क्रु
धद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः। क्रुधाद्यर्थानां प्रयोगे यं प्रतिकोपः स उक्तः
संज्ञः स्यात्। हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति। यं प्रतिकोपः किम्। भार्यामी
र्ष्यति मैनामन्योऽद्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु
दोषाविष्करणं। द्रुहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन यं

एम
८५

68

ना॥ यां येसंप्रयच्छति। कर्मणायमभिप्रैति स संप्रदानम्॥ दानस्य कर्मणा यमभिप्रैति स संप्र
दानसंज्ञं स्यात्॥ चतुर्थी संप्रदाने। स्पष्टम्। विप्राय गां ददाति। अनभिहितइत्येव। दानी
यो विप्रः। क्रियया यमभिप्रैति सोऽपि संप्रदानम्। पत्ये शेते। कर्मणः करणसंज्ञा संप्रदान-
स्य च कर्मसंज्ञा॥ पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥ रुच्यर्थानां प्रीयमाणः॥ रुच्य
र्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः संप्रदानं स्यात्॥ हरये रोचते भक्तिः॥ अन्यकर्तृकोऽभि
लाषो रुचिः॥ हरिनिष्ठप्रीतेर्भक्तिः कर्त्री॥ प्रीयमाणः किम्॥ देवदत्ताय रोचते मोदकः प
थि॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः॥ एषां प्रयोगे बोधयितुमिष्टः संप्रदानं स्यात्॥ गोपी
स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा। ज्ञीप्स्यमानः किम्। देवदत्ताय श्लाघते प

सि॰कौ॰
९६ कर्मणं परिकल्प्यणां तस्मिन् साधकतमं कारकं संप्रदानसंज्ञं वा स्यात्॥ शतेन शताय वा प
रिक्रीतः। तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिं भजति। क्लृपि संपद्यमाने च। भक्तिर्ज्ञानाय
संकल्पते संपद्यते। जायते। इत्यादि। उत्पातेन ज्ञाप्यते च। वाताय कपिला विद्युत्। आतपा
ताय लोहिता। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्॥ हितयोगे च। ब्राह्मणाय हि
तं। क्रियार्थोपपदस्य च कर्मणि स्थानिनः॥ क्रियार्था क्रिया उपपदं यस्य तस्य स्थानि
नो ऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्॥ फलेभ्यो याति। फलान्याहर्तुं यातीत्य
र्थः॥ नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः॥ एवं स्वयंभुवे नमस्कृत्ये रम
त्यादावपि। तुमर्थाच्च भाववचनात्॥ भाववचनाच्चेति सूत्रेण यो विहितस्तदन्ता [illegible] ९६

69

ऽतिकोप इति॥ क्रुधद्रुहोरुपसृष्टयोः कर्म। सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्म
संज्ञं स्यात्। क्रूरमभिक्रुध्यति। अभिद्रुह्यति। राधीक्ष्योर्यस्य विप्रश्नः। एतयोः कारकं सं
प्रदानं स्यात्। यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति ईक्षते वा। पृष्टो गर्गः शुभाशु
भं पर्यालोचयतीत्यर्थः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। आभ्यां परस्य शृणोतेर्योगे पूर्वस्य
प्रवर्तनरूपव्यापारस्य कर्ता संप्रदानं स्यात्। विप्राय गां प्रतिशृणोति। आशृणोतीति। वि
प्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः। अनुप्रतिगृणश्च। आभ्यां गृणातेः का
रकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्॥ होत्रेऽनुगृणाति। होता प्रथमं शंसति तम
ध्वर्युः प्रोत्साहयतीत्यर्थः। परिक्रयणे संप्रदानमन्यतरस्याम्॥ नियतकालं भृत्या स्वी

सि॰कौ॰ ८७

नाव। नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्॥ न त्वां नावं अन्नं मन्ये॥ यत्र त्वा
प्राणिन्वपि वेत्यर्थान॥ न त्वां शुने मन्ये इत्यत्र प्राणित्वेपि भवत्येव॥ गत्यर्थकर्मणि द्वि
तीयाचतुर्थ्यौ चेष्टायामनध्वनि॥ अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायाम्
ग्रामं ग्रामाय वा गच्छति॥ चेष्टायां किम्। मनसा हरिं व्रजति॥ अनध्वनीति किम्। पंथा
नं। गच्छति। गंत्राधिष्ठितेऽध्वन्येवायं निषेधः॥ यदा तूत्पथे पंथानमेवाक्रमितुमिष्यते त
दा चतुर्थी भवत्येव॥ उत्पथेन पथे गच्छति॥ ध्रुवमपायेपादानम्॥ अपायो विभागस्तस्मि
न्साध्ये ध्रुवमवधिभूतं कारकमपादानसंज्ञं स्यात्॥ अपादाने पंचमी। ग्रामादायाति॥ राम
धावतोऽश्वात्पतति॥ कारकं किम्। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थाना ८७
मुपसंख्यानं। पापाज्जुगुप्सते विरमति॥ धर्मात्प्रमाद्यति॥ भीत्रार्थानां भयहेतुः। भया

70

प्रकृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयो ध्रुवम् ४

च्चतुर्थी स्यात् ॥ प्रागग्यपाति ॥ एवं युक्तानीत्यर्थः ॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥
एभिर्योगे चतुर्थी स्यात् । हरये नम इत्यादि ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥
नमस्करोति देवान् ॥ प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । अलमिति पर्याप्त
र्थग्रहणम् । तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि । प्रभ्वादियोगे षष्ठ्यपि
साधुः ॥ तस्मै प्रभवति स एषां ग्रामणीरिति निर्देशात् ॥ तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति
सिद्धम् । वषडिन्द्राय । चकारः पुनर्विधानार्थः । तेनाशीर्विवक्षायां परामपि चतुर्थी चा-
शिषीति षष्ठीं बाधित्वा चतुर्थ्येव भवति ॥ स्वस्ति गोभ्यो भूयात् ॥ मन्यकर्मण्यनादरे
विभाषाप्राणिषु । प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे ॥ न त्वां तृणं म
न्ये तृणाय वा । १पणनामिति देशान्नानादिकयोगेन ॥ न त्वां तृणं मन्ये ॥ अप्राणिष्वित्यप

सि॰कौ॰ प्रकृतिः। जायमानस्य हेतुरपादानं स्यात्॥ ब्रह्मणः प्रजाः प्रजायन्ते। ब्रह्मणः प्रजायन्ते। भुवः
८८ म प्रभवः। भवनं भूः। भूकर्तुः प्रभवस्तथा। हिमवतो गंगा प्रभवति। तत्र प्रकाशत इत्यर्थः॥ ल्यब्लोपे क
र्मण्यधिकरणे च॥ प्रासादात्प्रेक्षते। आसनात्प्रेक्षते॥ प्रासादमारुह्य आसने उपविश्य प्रेक्षत
इत्यर्थः॥ श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः॥ गम्यमानापि क्रिया कारकविभक्तीनां निमित्तं।
कस्मात्त्वं नद्याः। यतश्चाध्वकालनिर्माणं तत्र पंचमी॥ तद्युक्तादध्वनः प्रथमासप्तम्यौ॥ कालात्
सप्तमी च वक्तव्या॥ वनाद्ग्रामो योजने योजनं वा॥ कार्त्तिक्या आग्रहायणी मासे॥ अन्यारादि
तरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते॥ एतैर्योगे पंचमी स्यात्॥ अन्य इत्यर्थग्रहणम्॥ इ रामः
तरग्रहणं प्रपंचार्थम्॥ अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्॥ ऋते कृष्णात्॥ पूर्वो ग्रा ८८
मात्॥ दिशि दृष्टः शब्दो दिक्शब्दः तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः

71

भीत्रार्थानां भयहेतुरपादानं स्यात्॥ चोराद्बिभेति। चोरात्त्रायते। भयहेतुः किम्॥ अरण्ये बिभेति। त्रायते वा। पराजेरसोढः। पराजेः प्रयोगे ऽसह्योर्थो ऽपादानं स्यात्। अध्ययनात्पराजयते। असोढः किम्। शत्रून्पराजयते। अभिभवतीत्यर्थः। वारणार्थानामीप्सितः॥ प्रवृत्तिविघातो वारणम्॥ वारणार्थानां प्रयोगे ईप्सितो ऽर्थो ऽपादानं स्यात्॥ यवेभ्यो गां वारयति॥ ईप्सितः किम। यवेभ्यो गां वारयति क्षेत्रे॥ अन्तर्द्धौ येनादर्शनमिच्छति। व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादा-नं स्यात्॥ मातुर्निलीयते कृष्णः॥ अन्तर्द्धौ किम॥ चौरान्न दिदृक्षते। इच्छतिग्रहणं किम॥ अदर्शनेच्छायां सत्यामपि दर्शने यथा स्यात्॥ आख्यातोपयोगे॥ नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्॥ उपाध्यायादधीते॥ उपयोगे किम॥ नटस्य गाथां शृणोति॥ जनिकर्तुः

सि० कौ०
७९

नेच यपस्मात् ॥ अत्र कर्मप्रवचनीययोगे पंचमी स्यात् ॥ प्रद्युम्नः कृष्णात्प्रति ॥ तिलेभ्यः प्रतियच्छ
ति माषान् ॥ अकर्तर्य्यृणे पंचमी । कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमी स्यात् ॥ शताद्बद्धः
अकर्तरि किम् ॥ शतेन बंधितः ॥ विभाषा गुणेऽस्त्रियाम् ॥ गुणे हेतावस्त्रीलिंगे पंचमी वा स्यात् ॥
जाड्या जाड्येन वा बद्धः ॥ गुणे किम् । धनेन कुलं । अस्त्रियां किम् बुद्ध्या मुक्तः । विभाषेति योगवि
भागादगुणे स्त्रियां च क्वचित् ॥ धूमादग्निमान् ॥ नास्ति घटोऽनुपलब्धेः ॥ पृथग्विनानाभि
स्तृतीयान्यतरस्याम् ॥ एभिर्योगे तृतीया स्यात्पंचमीद्वितीये च ॥ अन्यतरस्यांग्रहणं समुच्च
यार्थम् । पंचमीद्वितीये अनुवर्तेते । पृथग्रामेण रामात् रामं वा । एवं विनानाना ॥ करणे च ।
स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य ॥ एभ्योऽद्रव्यवचनेभ्यस्तृतीयापंचम्यौ स्तः ॥ स्तोकेन
स्तोकाद्वा मुक्तः ॥ द्रव्ये तु स्तोकेन विषेण हतः ॥ दूरांतिकार्थेभ्यो द्वितीया च ॥ एभ्यो द्विती

७९

72

फाल्गुनः॥ अथ यव वा स्त्रियोगे तत्॥ तस्य परमाम्रेडितमिति निर्देशात्॥ पूर्वकाव्यस्य॥ अंचूतरप
दस्यादिकशब्देष्वपि षष्ठन तस सर्वं प्रात्ययेनेति षष्ठी वा स्यिनुं पृथग्ग्रहणम्॥ प्राकृप्रत्यया योमा
त्॥ आच्छे। दक्षिणा ग्रामात्। आहि। दक्षिणाहि ग्रामात्। अपादाने पंचमीति सूत्रे कार्त्तिकाः प्र
भृति इति भाष्यप्रयोगात् प्रभृतियोगे पञ्चमी॥ भवात्प्रभृति भवादारभ्य वा सेव्यो हरिः॥ अपप
रिबहिरिति समासविधानात्॥ ज्ञापकाद्बहिर्योगे पञ्चमी॥ ग्रामाद्बहिः॥ अप परी वर्जने। एतौ व
र्जने कर्मप्रवचनीयौ स्तः॥ आङ् मर्यादावचने॥ आङ् मर्यादायामुक्तसंज्ञः स्यात्॥ वचनग्रह
णादभिविधावपि॥ पंचम्यपाङ्परिभिः॥ एतैः कर्मप्रवचनीययोगे पंचमी स्यात्॥ अपह
रेः। परिहरेः संसारः॥ परिरत्र वर्जने॥ लक्षणादौ तु हरिं परि॥ आमुक्तेः संसारः। आसकलाद्ब्र
ह्म। प्रतिः प्रतिनिधिप्रतिदानयोः॥ एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्॥ प्रतिनिधिप्रतिदा
१ मुख्यस्याभावेन सदृश उपादीयते स प्रतिनिधिः॥ [illegible] प्रतिदानम् १

सि०कौ०
ए०

प्रथमा द्वितीये मत्तः ॥ ज्ञानेनात्मनि तेन हरिः सेव्यः ॥ अनाश्रितानिमित्ता येत्याहि ॥ षष्ठ्यतसर्थप्रत्ययेन ।
।तसर्थेन योगे षष्ठी स्यात् ॥ दिक्शब्दैरिति पंचम्या अपवादः ॥ ग्रामस्य दक्षिणतः । पुरः । पुरस्तात् । उपरि । उ रि
परिष्टात् ॥ एनपा द्वितीया । एवं च योगे द्वितीया स्यात् ॥ एनपेति योगविभागात् षष्ठ्यपि ॥ दक्षिणे
न ग्रामस्य वा । एवमुत्तरेण ॥ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ एतैर्योगे षष्ठी स्यात् पञ्चमी च ॥
दूरं निकटं ग्रामस्य ग्रामाद्वा ॥ ज्ञोऽविदर्थस्य करणे ॥ जानातेरज्ञानार्थस्य करणे शेषत्वेन वि
73 वक्षिते षष्ठी स्यात् ॥ सर्पिषो जानीते । अधीगर्थदयेशां कर्मणि ॥ एषां कर्मणि शेषे षष्ठी स्या
त् ॥ मातुः स्मरणम् । सर्पिषो दयनम् ॥ ईशनं वा । कृञः प्रतियत्ने ॥ कृञः कर्मणि षष्ठी स्याद्गु एम
स णाधाने ॥ एधोदकस्योपस्करणं ॥ रुजार्थानां भाववचनानामज्वरेः ॥ भावकर्तृकाणां ज्वरिव ए०
र्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् ॥ चौरस्य रोगस्य रुजा ॥ अज्वरिसंताप्योरिति वा

या स्यात्॥ चा त्सं। चमीनत्ती ये। प्रातिपदिकार्थमात्रे विधिरयम्॥ ग्रामस्य दूरं दूरात् दूरेण वा॥
अन्तिकं॥ अन्तिकात्। अन्तिके न वा। असत्ववचनस्येत्यनुवर्तनेनेह। दूराः पन्थाः॥ षष्ठी शेषे
कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः॥ शेषस्तत्र षष्ठी स्यात्। राज्ञः पुरु
षः॥ कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव॥ सतां गतम्॥ सर्पिषो जानीते। मातुः
स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः॥ षष्ठी हेतुप्रयोगे॥ हे
तुशब्दस्य प्रयोगे हेतौ द्योत्ये च षष्ठी स्यात्। अन्नस्य हेतोर्वसति। सर्वनाम्नस्तृतीया च। सर्वना
म्नो हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोर्वसति।
निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्॥ किं निमित्तं वसति॥ केन निमित्तेन। कस्मै निमि
त्ताय इत्यादि॥ एवं किं कारणम्। को हेतुः। किं प्रयोजनम्। इत्यादि। प्रायग्रहणादसर्वनाम्नः

सि॰कौ॰
९१

र्थस्य च दिवः कर्मणि षष्ठी स्यात्॥ शतस्य दीव्यति॥ तदर्थस्य किम्॥ ब्राह्मणं दीव्यति॥
स्तौतीत्यर्थः॥ विभाषोपसर्गे॥ पूर्वयोगापवादः॥ शतस्य शतं वा प्रतिदीव्यति॥ प्रेष्यब्रुवोर्ह
विषो देवतासंप्रदाने॥ देवतासंप्रदानकेऽर्थे वर्त्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वा
चकाच्छब्दात्षष्ठी स्यात्॥ अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य॥ अनुब्रूहि वा॥ कृ
त्वोर्थप्रयोगे कालेऽधिकरणे च॥ कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्या
त्॥ पञ्चकृत्वोऽह्नो भोजनम्॥ द्विरह्नो भोजनम्॥ शेषे किम्॥ द्विरह्न्यध्ययनम्॥ कर्तृकर्म
णोः कृति॥ कृद्योगे कर्त्तरि कर्मणि च षष्ठी स्यात्॥ कृष्णस्य कृतिः॥ जगतः कर्त्ता कृष्णः॥
गुणकर्मणि वेष्यते॥ नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा॥ कृति किम्॥ तद्धिते मा भूत्॥ कृतपूर्वी

राम
९१

त्वम्॥ रोगस्य चौरज्वरः॥ चौरसंतापो वा॥ रोगकर्तृकं चौरस्य संबंधि ज्वरादिकमित्यर्थः॥ आशिषि
नाथः॥ आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्॥ सर्पिषो नाथनम्॥ आशिषीति किम्
माणवकनाथनम्॥ तत्संबंधिनी याच्ञेत्यर्थः॥ जासिनिप्रहणनाटक्राथपिषां हिंसायाम्
हिंसार्थानामेषां कर्मणि षष्ठी स्यात्॥ चौरस्योज्जासनम्॥ निप्रौ संहतौ। विपर्य्यस्तौ। व्यस्तौ च
चौरस्य निप्रहणनम्॥ चौरस्य प्रणिहननम्॥ निहननम्॥ प्रहणनम्॥ वा॥ नट अवस्यन्दे चु
रादिः॥ चौरस्योन्नाटनम्॥ चौरस्य क्राथनम्॥ वृषलस्य पेषणम्॥ हिंसायां किम्॥ धानापे
षणम्॥ व्यवहृपणोः समर्थयोः॥ शेषे कर्मणि षष्ठी स्यात्॥ द्यूते क्रयविक्रयव्यवहारे चानयोस्
तुल्यार्थता॥ शतस्य व्यवहरणम्॥ पणनं वा॥ समर्थयोः किम्॥ शलाकाव्यवहारः॥ गणना। इ
त्यर्थः॥ ब्राह्मणपणनं स्तुतिरित्यर्थः॥ दिवस्तदर्थस्य॥ द्यूतार्थस्य क्रयविक्रयरूपव्यवहा